॥ॐ॥

जय शङ्कर

श्रीशिवसहस्रनामस्तोत्राणि



8
S
802

JACL-KRC
026802

भगवान् कैलासवासी

शीश गंग अर्धंग पार्वती, सदा विराजत कैलासी ।
नंदी भृंगी नृत्य करत हैं, धरत ध्यान सुर सुखरासी ॥
शीतल मन्द सुगन्ध पवन बह, बैठे हैं शिव अविनाशी ।
करत गान गन्धर्व सप्त स्वर, राग रागिनी मधुरा-सी ॥
यक्ष-रक्ष भैरव जहँ डोलत, बोलत हैं वनके वासी ।
कोयल शब्द सुनावत सुन्दर, भ्रमर करत हैं गुंजा-सी ॥
कल्पद्रुम अरु पारिजात तरु, लाग रहे हैं लक्षासी ।
कामधेनु कोटिन जहँ डोलत, करत दुग्धकी वर्षा-सी ॥
सूर्यकान्त सम पर्वत शोभित, चन्द्रकान्त सम हिमराशी ।
नित्य छहों ऋतु रहत सुशोभित, सेवत सदा प्रकृति-दासी ॥
ऋषि-मुनि देव दनुज नित सेवत, गान करत श्रुति गुणराशी ।
ब्रह्मा-विष्णु निहारत निसिदिन, कछु शिव हमकूँ फरमासी ॥
ऋद्धि सिद्धिके दाता शङ्कर, नित सत् चित् आनँदराशी ।
जिनके सुमिरत ही कट जाती, कठिन काल-यमकी फाँसी ॥
त्रिशूलधरजीका नाम निरंतर, प्रेम सहित जो नर गासी ।
दूर होय विपदा उस नरकी, जन्म-जन्म शिवपद पासी ॥
कैलासी काशीके वासी, अविनाशी मेरी सुध लीजो ।
सेवक जान सदा चरननको, अपनो जान कृपा कीजो ॥
तुम जो प्रभुजी सदा दयामय, अवगुण मेरे सब ढकियो ।
सब अपराध क्षमाकर शङ्कर, किंकरकी विनती सुनियो ॥

।। श्री गणेशाय नमः।।

श्रीशिवसहस्रनामस्तोत्रम्

राष्ट्रिय संस्कृत ... ग्रन्थालय जयपुर

26802

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्व मम देवदेव।।

डॉ. रानी शर्मा
9414145879
9414279836

SV-2024

निःशुल्क सप्रेम भेंट

12.2 I

JACL-KRC
026802

नमः शिवाय ।।

प्रिय शिव भक्तों



इस पुस्तक में ११ प्रकार के शिवसहस्रनामस्तोत्र का संकलन किया गया है एवं यह पुस्तक समस्त शिव भक्तों के लिये एक अमुल्य भेंट स्वरूप निःशुल्क समर्पित है

श्रीशिवसहस्रनाम स्तुति करने से अश्वमेघ यज्ञ का फल प्राप्त होता है (अर्थात इन्द्रासन की प्राप्ति)

अतः महादेव की भक्ति हेतु इन शिवसहस्रनामों की स्तुति करने से पूर्व, देवताओं के राजा "देवराज इन्द्र" को नमन कर उनका आर्शीवाद अवश्य प्राप्त कर लेना चाहिए

।। जय शंङ्कर ।।

कुल मुद्रण १००० प्रतियां

सम्पर्क-सूत्र
E-mail : rahultaak@gmail.com

१ शिवसहस्त्रानामस्तोत्रम्

26802

वासुदेव उवाच

ततः स प्रयतो भूत्वा मम तात युधिष्ठिर।
प्राञ्जलिः प्राह विप्रर्षिर्नामसंग्रहमादितः॥ १॥

उपमन्युरुवाच

ब्रह्मप्रोक्तैर्ऋषिप्रोक्तैर्वेदवेदाङ्गसम्भवैः।
सर्वलोकेषु विख्यातं स्तुत्यं स्तोष्यामि नामभिः॥ २॥
महद्भिर्विहितैः सत्यैः सिद्धैः सर्वार्थसाधकैः।
ऋषिणा तण्डिना भक्त्या कृतैर्वेदकृतात्मना॥ ३॥
यथोक्तैः साधुभिः ख्यातैर्मुनिभिस्तत्त्वदर्शिभिः।
प्रवरं प्रथमं स्वर्ग्यं सर्वभूतहितं शुभम्॥ ४॥
श्रुतैः सर्वत्र जगति ब्रह्मलोकावतारितैः।
सत्यैस्तत् परमं ब्रह्म ब्रह्मप्रोक्तं सनातनम्॥ ५॥

वक्ष्ये यदुकुलश्रेष्ठ शृणुष्वावहितो मम।
वरयैनं भवं देवं भक्तस्त्वं परमेश्वरम्॥ ६॥
तेन ते श्रावयिष्यामि यत् तद् ब्रह्म सनातनम्।
न शक्यं विस्तरात् कृत्स्नं वक्तुं सर्वस्य केनचित्॥ ७॥
युक्तेनापि विभूतीनामपि वर्षशतैरपि।
यस्यादिर्मध्यमन्तं च सुरैरपि न गम्यते॥ ८॥
कस्तस्य शक्नुयाद् वक्तुं गुणान् कार्त्स्न्येन माधव।
किं तु देवस्य महतः संक्षिप्तार्थपदाक्षरम्॥ ९॥
शक्तितश्चरितं वक्ष्ये प्रसादात् तस्य धीमतः।
अप्राप्य तु ततोऽनुज्ञां न शक्यः स्तोतुमीश्वरः॥ १०॥
यदा तेनाभ्यनुज्ञातः स्तुतो वै स तदा मया।
अनादिनिधनस्याहं जगद्योनेर्महात्मनः॥ ११॥
नाम्नां कञ्चित् समुद्देशं वक्ष्याम्यव्यक्तयोनिनः।
वरदस्य वरेण्यस्य विश्वरूपस्य धीमतः॥ १२॥
शृणु नाम्नां चयं कृष्ण यदुक्तं पद्मयोनिना।
दशनामसहस्राणि यान्याह प्रपितामहः॥ १३॥
तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतम्।
गिरेः सारं यथा हेम पुष्पसारं यथा मधु॥ १४॥
घृतात् सारं यथा मण्डस्तथैतत् सारमुद्धृतम्।
सर्वपापापहमिदं चतुर्वेदसमन्वितम्॥ १५॥
प्रयत्नेनाधिगन्तव्यं धार्यं च प्रयतात्मना।
माङ्गल्यं पौष्टिकं चैव रक्षोघ्नं पावनं महत्॥ १६॥
इदं भक्ताय दातव्यं श्रद्दधानास्तिकाय च।
नाश्रद्दधानरूपाय नास्तिकायाजितात्मने॥ १७॥
यश्चाभ्यसूयते देवं कारणात्मानमीश्वरम्।
स कृष्ण नरकं याति सह पूर्वैः सहात्मजैः॥ १८॥
इदं ध्यानमिदं योगमिदं ध्येयमनुत्तमम्।
इदं जप्यमिदं ज्ञानं रहस्यमिदमुत्तमम्॥ १९॥

यं ज्ञात्वा अन्तकालेऽपि गच्छेत परमां गतिम्।
पवित्रं मङ्गलं मेध्यं कल्याणमिदमुत्तमम्॥ २०॥
इदं ब्रह्मा पुरा कृत्वा सर्वलोकपितामहः।
सर्वस्तवानां राजत्वे दिव्यानां समकल्पयत्॥ २१॥
तदाप्रभृति चैवायमीश्वरस्य महात्मनः।
स्तवराज इति ख्यातो जगत्यमरपूजितः॥ २२॥
ब्रह्मलोकादयं स्वर्गे स्तवराजोऽवतारितः।
यतस्तण्डिः पुरा प्राप तेन तण्डिकृतोऽभवत्॥ २३॥
स्वर्गाच्चैवात्र भूर्लोकं तण्डिना ह्यवतारितः।
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम्॥ २४॥
निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम्।
ब्रह्मणामपि यद् ब्रह्म पराणामपि यत् परम्॥ २५॥
तेजसामपि यत् तेजस्तपसामपि यत् तपः।
शान्तानामपि यः शान्तो द्युतीनामपि या द्युतिः॥ २६॥
दान्तानामपि यो दान्तो धीमतामपि या च धीः।
देवानामपि यो देव ऋषीणामपि यस्त्वृषिः॥ २७॥
यज्ञानामपि यो यज्ञः शिवानामपि यः शिवः।
रुद्राणामपि यो रुद्रः प्रभा प्रभवतामपि॥ २८॥
योगिनामपि यो योगी कारणानां च कारणम्।
यतो लोकाः सम्भवन्ति न भवन्ति यतः पुनः॥ २९॥
सर्वभूतात्मभूतस्य हरस्यामिततेजसः।
अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु।
यच्छ्रुत्वा मनुजव्याघ्र सर्वान् कामानवाप्स्यसि॥ ३०॥
स्थिरः स्थाणुः प्रभुर्भीमः प्रवरो वरदो वरः।
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः॥ ३१॥
जटी चर्मी शिखण्डी च सर्वाङ्गः सर्वभावनः।
हरश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः॥ ३२॥
प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः।
श्मशानवासी भगवान् खचरो गोचरोऽर्दनः॥ ३३॥

अभिवाद्यो महाकर्मा तपस्वी भूतभावनः।
उन्मत्तवेषप्रच्छन्नः सर्वलोकप्रजापतिः॥ ३४॥
महारूपो महाकायो वृषरूपो महायशाः।
महात्मा सर्वभूतात्मा विश्वरूपो महाहनुः॥ ३५॥
लोकपालोऽन्तर्हितात्मा प्रसादो हयगर्दभिः।
पवित्रं च महांश्चैव नियमो नियमाश्रितः॥ ३६॥
सर्वकर्मा स्वयम्भूत आदिरादिकरो निधिः।
सहस्त्राक्षो विशालाक्षः सोमो नक्षत्रसाधकः॥ ३७॥
चन्द्रः सूर्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः।
अत्रिरत्र्या नमस्कर्ता मृगबाणार्पणोऽनघः॥ ३८॥
महातपा घोरतपा अदीनो दीनसाधकः।
संवत्सरकरो मन्त्रः प्रमाणं परमं तपः॥ ३९॥
योगी योज्यो महाबीजो महारेता महाबलः।
सुवर्णरेताः सर्वज्ञः सुबीजो बीजवाहनः॥ ४०॥
दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः।
विश्वरूपः स्वयं श्रेष्ठो बलवीरोऽबलो गणः॥ ४१॥
गणकर्ता गणपतिर्दिग्वासाः काम एव च।
मन्त्रवित् परमो मन्त्रः सर्वभावकरो हरः॥ ४२॥
कमण्डलुधरो धन्वी बाणहस्तः कपालवान्।
अशनी शतघ्नी खड्गी पट्टिशी चायुधी महान्॥ ४३॥
स्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः।
उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा॥ ४४॥
दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च।
शृगालरूपः सिद्धार्थो मुण्डः सर्वशुभङ्करः॥ ४५॥
अजश्च बहुरूपश्च गन्धधारी कपर्द्यपि।
ऊर्ध्वरेता ऊर्ध्वलिङ्ग ऊर्ध्वशायी नभःस्थलः॥ ४६॥
त्रिजटी चीरवासाश्च रुद्रः सेनापतिर्विभुः।
अहश्चरो नक्तंचरस्तिग्ममन्युः सुवर्चसः॥ ४७॥

गजहा दैत्यहा कालो लोकधाता गुणाकरः।
सिंहशार्दूलरूपश्च आर्द्रचर्माम्बरावृतः॥ ४८॥
कालयोगी महानादः सर्वकामश्चतुष्पथः।
निशाचरः प्रेतचारी भूतचारी महेश्वरः॥ ४९॥
बहुभूतो बहुधरः स्वर्भानुरमितो गतिः।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलालसः॥ ५०॥
घोरो महातपाः पाशो नित्यो गिरिरुहो नभः।
सहस्रहस्तो विजयो व्यवसायो ह्यतन्द्रितः॥ ५१॥
अधर्षणो धर्षणात्मा यज्ञहा कामनाशकः।
दक्षयागापहारी च सुसहो मध्यमस्तथा॥ ५२॥
तेजोऽपहारी बलहा मुदितोऽर्थोऽजितोऽवरः।
गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः॥ ५३॥
न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः।
सुतीक्ष्णदशनश्चैव महाकायो महाननः॥ ५४॥
विष्वक्सेनो हरिर्यज्ञः संयुगापीडवाहनः।
तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित्॥ ५५॥
विष्णुप्रसादितो यज्ञः समुद्रो वडवामुखः।
हुताशनसहायश्च प्रशान्तात्मा हुताशनः॥ ५६॥
उग्रतेजा महातेजा जन्यो विजयकालवित्।
ज्योतिषामयनं सिद्धिः सर्वविग्रह एव च॥ ५७॥
शिखी मुण्डी जटी ज्वाली मूर्तिजो मूर्द्धगो बली।
वेणवी पणवी ताली खली कालकटंकटः॥ ५८॥
नक्षत्रविग्रहमतिर्गुणबुद्धिर्लयोऽगमः।
प्रजापतिर्विश्वबाहुर्विभागः सर्वगोऽमुखः॥ ५९॥
विमोचनः सुसरणो हिरण्यकवचोद्भवः।
मेढ्रजो बलचारी च महीचारी स्रुतस्तथा॥ ६०॥
सर्वतूर्यनिनादी च सर्वातोद्यपरिग्रहः।
व्यालरूपो गुहावासी गुहो माली तरङ्गवित्॥ ६१॥
त्रिदशस्त्रिकालधृक् कर्म सर्वबन्धविमोचनः।
बन्धनस्त्वसुरेन्द्राणां युधिशत्रुविनाशनः॥ ६२॥

सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः।
प्रस्कन्दनो विभागज्ञोऽतुल्यो यज्ञविभागवित्॥ ६३॥
सर्ववासः सर्वचारी दुर्वासा वासवोऽमरः।
हैमो हेमकरोऽयज्ञः सर्वधारी धरोत्तमः॥ ६४॥
लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः।
संग्रहो निग्रहः कर्ता सर्पचीरनिवासनः॥ ६५॥
मुख्योऽमुख्यश्च देहश्च काहलिः सर्वकामदः।
सर्वकालप्रसादश्च सुबलो बलरूपधृक्॥ ६६॥
सर्वकामवरश्चैव सर्वदः सर्वतोमुखः।
आकाशनिर्विरूपश्च निपाती ह्यवशः खगः॥ ६७॥
रौद्ररूपोंऽशुरादित्यो बहुरश्मिः सुवर्चसी।
वसुवेगो महावेगो मनोवेगो निशाचरः॥ ६८॥
सर्ववासी श्रियावासी उपदेशकरोऽकरः।
मुनिरात्मनिरालोकः सम्भग्नश्च सहस्रदः॥ ६९॥
पक्षी च पक्षरूपश्च अतिदीप्तो विशाम्पतिः।
उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः॥ ७०॥
वामदेवश्च वामश्च प्राग् दक्षिणश्च वामनः।
सिद्धयोगी महर्षिश्च सिद्धार्थः सिद्धसाधकः॥ ७१॥
भिक्षुश्च भिक्षुरूपश्च विपणो मृदुरव्ययः।
महासेनो विशाखश्च षष्टिभागो गवां पतिः॥ ७२॥
वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च।
वृत्तावृत्तकरस्तालो मधुर्मधुकलोचनः॥ ७३॥
वाचस्पत्यो वाजसनो नित्यमाश्रमपूजितः।
ब्रह्मचारी लोकचारी सर्वचारी विचारवित्॥ ७४॥
ईशान ईश्वरः कालो निशाचारी पिनाकवान्।
निमित्तस्थो निमित्तं च नन्दिर्नन्दिकरो हरिः॥ ७५॥
नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्द्धनः।
भगहारी निहन्ता च कालो ब्रह्मा पितामहः॥ ७६॥
चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च।
लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः॥ ७७॥

बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः।
इतिहासः सकल्पश्च गौतमोऽथ निशाकरः॥ ७८॥
दम्भो ह्यदम्भो वैदम्भो वश्यो वशकरः कलिः।
लोककर्ता पशुपतिर्महाकर्ता ह्यनौषधः॥ ७९॥
अक्षरं परमं ब्रह्म बलवच्छक्र एव च।
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो गतागतः॥ ८०॥
बहुप्रसादः सुस्वप्नो दर्पणोऽथ त्वमित्रजित्।
वेदकारो मन्त्रकारो विद्वान् समरमर्दनः॥ ८१॥
महामेघनिवासी च महाघोरो वशी करः।
अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः॥ ८२॥
वृषणः शङ्करो नित्यं वर्चस्वी धूमकेतनः।
नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः॥ ८३॥
स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः।
उत्सङ्गश्च महाङ्गश्च महागर्भपरायणः॥ ८४॥
कृष्णवर्णः सुवर्णश्च इन्द्रियं सर्वदेहिनाम्।
महापादो महाहस्तो महाकायो महायशाः॥ ८५॥
महामूर्धा महामात्रो महानेत्रो निशालयः।
महान्तको महाकर्णो महोष्ठश्च महाहनुः॥ ८६॥
महानासो महाकम्बुर्महाग्रीवः श्मशानभाक्।
महावक्षा महोरस्को ह्यन्तरात्मा मृगालयः॥ ८७॥
लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः।
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः॥ ८८॥
महानखो महारोमा महाकोशो महाजटः।
प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः॥ ८९॥
स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः।
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः॥ ९०॥
गण्डली मेरुधामा च देवाधिपतिरेव च।
अथर्वशीर्षः सामास्य ऋक्सहस्त्रामितेक्षणः॥ ९१॥
यजुः पादभुजो गुह्यः प्रकाशो जङ्गमस्तथा।
अमोघार्थः प्रसादश्च अभिगम्यः सुदर्शनः॥ ९२॥

उपकारः प्रियः सर्वः कनकः काञ्चनच्छविः।
नाभिर्नन्दिकरो भावः पुष्करस्थपतिः स्थिरः॥ ९३ ॥
द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः।
नक्तं कलिश्च कालश्च मकरः कालपूजितः॥ ९४ ॥
सगणो गणकारश्च भूतवाहनसारथिः।
भस्मशयो भस्मगोप्ता भस्मभूतस्तरुर्गणः॥ ९५ ॥
लोकपालस्तथालोको महात्मा सर्वपूजितः।
शुक्लस्त्रिशुक्लः सम्पन्नः शुचिर्भूतनिषेवितः॥ ९६ ॥
आश्रमस्थः क्रियावस्थो विश्वकर्ममतिर्वरः।
विशालशाखस्ताम्रोष्ठो ह्यम्बुजालः सुनिश्चलः॥ ९७ ॥
कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः।
गन्धर्वो ह्यदितिस्ताक्ष्य्रः सुविज्ञेयः सुशारदः॥ ९८ ॥
परश्वधायुधो देवो अनुकारी सुबान्धवः।
तुम्बवीणो महाक्रोध ऊर्ध्वरेता जलेशयः॥ ९९ ॥
उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दितः।
सर्वाङ्गरूपो मायावी सुहृदो ह्यनिलोऽनलः॥ १०० ॥
बन्धनो बन्धकर्ता च सुबन्धनविमोचनः।
सयज्ञारिः सकामारिर्महादंष्ट्रो महायुधः॥ १०१ ॥
बहुधा निन्दितः शर्वः शङ्करः शङ्करोऽधनः।
अमरेशो महादेवो विश्वदेवः सुरारिहा॥ १०२ ॥
अहिर्बुध्न्योऽनिलाभश्च चेकितानो हविस्तथा।
अजैकपाच्च कापाली त्रिशङ्कुरजितः शिवः॥ १०३ ॥
धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः॥ १०४ ॥
प्रभावः सर्वगो वायुरर्यमा सविता रविः।
उषङ्गुश्च विधाता च मान्धाता भूतभावनः॥ १०५ ॥
विभुर्वर्णविभावी च सर्वकामगुणावहः।
पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः॥ १०६ ॥
बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी।
कुरुकर्ता कुरुवासी कुरुभूतो गुणौषधः॥ १०७ ॥

सर्वाशयो दर्भचारी सर्वेषां प्राणिनां पतिः।
देवदेवः सुखासक्तः सदसत्सर्वरत्नवित्॥ १०८॥
कैलासगिरिवासी च हिमवद्गिरिसंश्रयः।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः॥ १०९॥
वणिजो वर्धकी वृक्षो बकुलश्चन्दनश्छदः।
सारग्रीवो महाजत्रुरलोलश्च महौषधः॥ ११०॥
सिद्धार्थकारी सिद्धार्थश्छन्दोव्याकरणोत्तरः।
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः॥ १११॥
प्रभावात्मा जगत्कालस्थालो लोकहितस्तरुः।
सारङ्गो नवचक्राङ्गः केतुमाली सभावनः॥ ११२॥
भूतालयो भूतपतिरहोरात्रमनिन्दितः॥ ११३॥
वाहिता सर्वभूतानां निलयश्च विभुर्भवः।
अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः॥ ११४॥
धृतिमान् मतिमान् दक्षः सत्कृतश्च युगाधिपः।
गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरिः॥ ११५॥
हिरण्यबाहुश्च तथा गुहापालः प्रवेशिनाम्।
प्रकृष्टारिर्महाहर्षो जितकामो जितेन्द्रियः॥ ११६॥
गान्धारश्च सुवासश्च तपःसक्तो रतिर्नरः।
महागीतो महानृत्यो ह्यप्सरोगणसेवितः॥ ११७॥
महाकेतुर्महाधातुर्नैकसानुचरश्चलः।
आवेदनीय आदेशः सर्वगन्धसुखावहः॥ ११८॥
तोरणस्तारणो वातः परिधी पतिखेचरः।
संयोगो वर्धनो वृद्धो अतिवृद्धो गुणाधिकः॥ ११९॥
नित्य आत्मसहायश्च देवासुरपतिः पतिः।
युक्तश्च युक्तबाहुश्च देवो दिविसुपर्वणः॥ १२०॥
आषाढश्च सुषाढश्च ध्रुवोऽथ हरिणो हरः।
वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथः॥ १२१॥
शिरोहारी विमर्शश्च सर्वलक्षणलक्षितः।
अक्षश्च रथयोगी च सर्वयोगी महाबलः॥ १२२॥

समाम्नायोऽसमाम्नायस्तीर्थदेवो महारथः।
निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः॥ १२३॥
रत्नप्रभूतो रत्नाङ्गो महार्णवनिपानवित्।
मूलं विशालो ह्यमृतो व्यक्ताव्यक्तस्तपोनिधिः॥ १२४॥
आरोहणोऽधिरोहश्च शीलधारी महायशाः।
सेनाकल्पो महाकल्पो योगो युगकरो हरिः॥ १२५॥
युगरूपो महारूपो महानागहनोऽवधः।
न्यायनिर्वपणः पादः पण्डितो ह्यचलोपमः॥ १२६॥
बहुमालो महामालः शशी हरसुलोचनः।
विस्तारो लवणः कूपस्त्रियुगः सफलोदयः॥ १२७॥
त्रिलोचनो विषण्णाङ्गो मणिविद्धो जटाधरः।
विन्दुर्विसर्गः सुमुखः शरः सर्वायुधः सहः॥ १२८॥
निवेदनः सुखाजातः सुगन्धारो महाधनुः।
गन्धपाली च भगवानुत्थानः सर्वकर्मणाम्॥ १२९॥
मन्थानो बहुलो वायुः सकलः सर्वलोचनः।
ततस्तालः करस्थाली ऊर्ध्वसंहननो महान्॥ १३०॥
छत्रं सुच्छत्रो विख्यातो लोकः सर्वाश्रयः क्रमः।
मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः॥ १३१॥
हर्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात्।
सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः॥ १३२॥
सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत्।
पवित्रं त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिङ्गलः॥ १३३॥
ब्रह्मदण्डविनिर्माता शतघ्नीपाशशक्तिमान्।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः॥ १३४॥
गभस्तिर्ब्रह्मकृद् ब्रह्मी ब्रह्मविद् ब्राह्मणो गतिः।
अनन्तरूपो नैकात्मा तिग्मतेजाः स्वयम्भुवः॥ १३५॥
ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः।
चन्दनी पद्मनालाग्रः सुरभ्युत्तरणो नरः॥ १३६॥
कर्णिकारमहास्रग्वी नीलमौलिः पिनाकधृत्।
उमापतिरुमाकान्तो जाह्नवीधृदुमाधवः॥ १३७॥

वरो वराहो वरदो वरेण्यः सुमहास्वनः।
महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः॥ १३८॥
पीतात्मा परमात्मा च प्रयतात्मा प्रधानधृत्।
सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणो वरः॥ १३९॥
चराचरात्मा सूक्ष्मात्मा अमृतो गोवृषेश्वरः।
साध्यर्षिर्वसुरादित्यो विवस्वान् सवितामृतः॥ १४०॥
व्यासः सर्गः सुसंक्षेपो विस्तरः पर्ययो नरः।
ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः॥ १४१॥
कलाः काष्ठा लवा मात्रा मुहूर्ताहःक्षपाः क्षणाः।
विश्वक्षेत्रं प्रजाबीजं लिङ्गमाद्यस्तु निर्गमः॥ १४२॥
सदसद् व्यक्तमव्यक्तं पिता माता पितामहः।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम्॥ १४३॥
निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परा गतिः।
देवासुरविनिर्माता देवासुरपरायणः॥ १४४॥
देवासुरगुरुर्देवो देवासुरनमस्कृतः।
देवासुरमहामात्रो देवासुरगणाश्रयः॥ १४५॥
देवासुरगणाध्यक्षो देवासुरगणाग्रणीः।
देवातिदेवो देवर्षिर्देवासुरवरप्रदः॥ १४६॥
देवासुरेश्वरो विश्वो देवासुरमहेश्वरः।
सर्वदेवमयोऽचिन्त्यो देवतात्माऽऽत्मसम्भवः॥ १४७॥
उद्भित् त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः।
ईड्यो हस्तीश्वरो व्याघ्रो देवसिंहो नरर्षभः॥ १४८॥
विबुधोऽग्रवरः सूक्ष्मः सर्वदेवस्तपोमयः।
सुयुक्तः शोभनो वज्री प्रासानां प्रभवोऽव्ययः॥ १४९॥
गुहः कान्तो निजः सर्गः पवित्रं सर्वपावनः।
शृङ्गी शृङ्गप्रियो बभ्रू राजराजो निरामयः॥ १५०॥
अभिरामः सुरगणो विरामः सर्वसाधनः।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः॥ १५१॥
स्थावराणां पतिश्चैव नियमेन्द्रियवर्धनः।
सिद्धार्थः सिद्धभूतार्थोऽचिन्त्यः सत्यव्रतः शुचिः॥ १५२॥

व्रताधिपः परं ब्रह्म भक्तानां परमा गतिः।
विमुक्तो मुक्ततेजाश्च श्रीमाञ्श्रीवर्धनो जगत्॥ १५३॥
यथाप्रधानं भगवानिति भक्त्या स्तुतो मया।
यन्न ब्रह्मादयो देवा विदुस्तत्त्वेन नर्षयः॥ १५४॥
स्तोतव्यमर्च्यं वन्द्यं च कः स्तोष्यति जगत्पतिम्।
भक्त्या त्वेवं पुरस्कृत्य मया यज्ञपतिर्विभुः॥ १५५॥
ततोऽभ्यनुज्ञां सम्प्राप्य स्तुतो मतिमतां वरः।
शिवमेभिः स्तुवन् देवं नामभिः पुष्टिवर्धनैः॥ १५६॥
नित्ययुक्तः शुचिर्भक्तः प्राप्नोत्यात्मानमात्मना॥ १५७॥
एतद्धि परमं ब्रह्म परं ब्रह्माधिगच्छति।
ऋषयश्चैव देवाश्च स्तुवन्त्येतेन तत्परम्॥ १५८॥
स्तूयमानो महादेवस्तुष्यते नियतात्मभिः।
भक्तानुकम्पी भगवानात्मसंस्थाकरो विभुः॥ १५९॥
तथैव च मनुष्येषु ये मनुष्याः प्रधानतः।
आस्तिकाः श्रद्दधानाश्च बहुभिर्जन्मभिः स्तवैः॥ १६०॥
भक्त्या ह्यनन्यमीशानं परं देवं सनातनम्।
कर्मणा मनसा वाचा भावेनामिततेजसः॥ १६१॥
शयाना जाग्रमाणाश्च व्रजन्नुपविशंस्तथा।
उन्मिषन् निमिषंश्चैव चिन्तयन्तः पुनः पुनः॥ १६२॥
शृण्वन्तः श्रावयन्तश्च कथयन्तश्च ते भवम्।
स्तुवन्तः स्तूयमानाश्च तुष्यन्ति च रमन्ति च॥ १६३॥
जन्मकोटिसहस्रेषु नानासंसारयोनिषु।
जन्तोर्विगतपापस्य भवे भक्तिः प्रजायते॥ १६४॥
उत्पन्ना च भवे भक्तिरनन्या सर्वभावतः।
भाविनः कारणे चास्य सर्वयुक्तस्य सर्वथा॥ १६५॥
एतद् देवेषु दुष्प्रापं मनुष्येषु न लभ्यते।
निर्विघ्ना निश्चला रुद्रे भक्तिरव्यभिचारिणी॥ १६६॥
तस्यैव च प्रसादेन भक्तिरुत्पद्यते नृणाम्।
येन यान्ति परां सिद्धिं तद्भावगतचेतसः॥ १६७॥

ये सर्वभावानुगताः प्रपद्यन्ते महेश्वरम्।
प्रपन्नवत्सलो देवः संसारात् तान् समुद्धरेत्॥ १६८॥

एवमन्ये विकुर्वन्ति देवाः संसारमोचनम्।
मनुष्याणामृते देवं नान्या शक्तिस्तपोबलम्॥ १६९॥

इति तेनेन्द्रकल्पेन भगवान् सदसत्पतिः।
कृत्तिवासाः स्तुतः कृष्ण तण्डिना शुभबुद्धिना॥ १७०॥
स्तवमेतं भगवतो ब्रह्मा स्वयमधारयत्।

गीयते च स बुद्ध्येत ब्रह्मा शङ्करसंनिधौ॥ १७१॥
इदं पुण्यं पवित्रं च सर्वदा पापनाशनम्।

योगदं मोक्षदं चैव स्वर्गदं तोषदं तथा॥ १७२॥
एवमेतत् पठन्ते य एकभक्त्या तु शङ्करम्।
या गतिः सांख्ययोगानां व्रजन्त्येतां गतिं तदा॥ १७३॥
स्तवमेतं प्रयत्नेन सदा रुद्रस्य संनिधौ।
अब्दमेकं चरेद् भक्तः प्राप्नुयादीप्सितं फलम्॥ १७४॥

एतद् रहस्यं परमं ब्रह्मणो हृदि संस्थितम्।
ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे॥ १७५॥
मृत्युः प्रोवाच रुद्रेभ्यो रुद्रेभ्यस्तण्डिमागमत्।
महता तपसा प्राप्तस्तण्डिना ब्रह्मसद्मनि॥ १७६॥

तण्डिः प्रोवाच शुक्राय गौतमाय च भार्गवः।
वैवस्वताय मनवे गौतमः प्राह माधव॥ १७७॥

नारायणाय साध्याय समाधिष्ठाय धीमते।
यमाय प्राह भगवान् साध्यो नारायणोऽच्युतः॥ १७८॥

नाचिकेताय भगवानाह वैवस्वतो यमः।
मार्कण्डेयाय वार्ष्णेय नाचिकेतोऽभ्यभाषत॥ १७९॥

मार्कण्डेयान्मया प्राप्तो नियमेन जनार्दन।
तवाप्यहममित्रघ्न स्तवं दद्यां ह्यविश्रुतम्॥ १८०॥

स्वर्ग्यमारोग्यमायुष्यं धन्यं वेदेन सम्मितम्।
नास्य विघ्नं विकुर्वन्ति दानवा यक्षराक्षसाः।
पिशाचा यातुधाना वा गुह्यका भुजगा अपि॥ १८१॥
यः पठेत शुचिः पार्थ ब्रह्मचारी जितेन्द्रियः।
अभग्नयोगो वर्षं तु सोऽश्वमेधफलं लभेत्॥ १८२॥

इति श्रीमहाभारते अनुशासनपर्वणि शिवसहस्रनामस्तोत्रं सम्पूर्णम्॥

२

अथ श्री पद्मपुराणान्तर्गतं

श्रीशिवसहस्रनामस्तोत्रम्

नमः परमदेवाय शंकराय महात्मने ।
कामिनेनीलकंठाय निर्मूलायकपर्दिने ॥१॥

निर्विकल्पाय शांताय निरहंकारिणे नमः ।
अनर्घ्याय विशालाय शालहस्तायते नमः ॥२॥

निरंजनाय शर्वाय शंकराय परात्मने ।
नमः शर्वाय नगयि गुणातीताय वेधसे ॥३॥

महादेवाय पीताय पार्वतीपतये नमः ।
केवलाय महेशाय विशुद्धाय बुधात्मने ॥४॥

कैवल्याय सुधेशाय निस्पृहाय सुरूपिणे ।
नमः सोमाय श्रूयाय कालायामिततेजसे ॥५॥

अजराय जगत्पित्रे जनकाय पिनाकिने ।
निराधाराय सिंहाय मायातीतायते नमः ॥६॥

बीजाय सर्वभूषाय पशूनां पतये नमः ।
पुरंदरायमज्ञाय पुरुषाय महीयसे ॥७॥

महासंतोष रूपाय ज्ञानिने शुद्ध बुद्धये ।
वृद्धाय बहुरूपाय तारायपरमात्मने ॥८॥

पूर्वजाय सुरेशाय ब्रह्मणेनंत मूर्तये ।
निरक्षराय सूक्ष्माय कैलाश पतये नमः ॥९॥

निरामायाय कांताय निरातंकायते नमः ।
निरालंबाय विश्वाय नित्याय पतये नमः ॥१०॥

आत्मारामायनं नव्याय पूज्याय परमेष्टिने ।
निकर्तनायमीमायशंनवे विश्वरूपिणे ॥११॥

हंसाय हंसनाथाय प्रसिद्धाय नमो नमः ।
परा परायरुद्राय मवायालंध्यशक्तये ॥१२॥

इन्द्रहंत्रे निधीशायकालहंत्रे मनस्विने ।
विश्वमात्रे जगद्धात्रे जगन्नेत्रे नमो नमः ॥१३॥

जटिलाय विरागाय पवित्राय मृडाय च ।
निरवद्याय पात्राय निरातंकायते नमः ॥१४॥

नादाय रविनेत्राय व्योमकेशायते नमः ।
चतुर्भोगाय साराय योगिनेनंत मायिने ॥१५॥

धर्मिष्ठाय वरिष्ठाय पुरत्रय विघातिने ।
रिष्टाय गरेशाय वरदाय नमो नमः ॥१६॥

व्याघ्रचर्मांबरायाय दिशावस्त्रायते नमः ।
परमार्थाय मंत्राय प्रथमाय सुचक्षुषे ॥१७॥

अघाय शूलहस्ताय शितिकंठायते नमः ।
उग्राय वामदेवाय श्रीकंठाय नमो नमः ॥१८॥

विश्वेश्वराय सूर्याय गौरीशाय पराय च ।
मृत्युंजयाय वीराय वीरभद्रायते नमः ॥१९॥

कामनाशायगुरवे मुक्तिनाशायते नमः ।
विरूपाक्षाय विधये वह्नि नेत्रायते नमः ॥२०॥

जालंधर शिरछेत्रेह विषेहितकारिणे ।
महाकालायवैद्याय धुसृणेशायवै नमः ॥२१॥

नम उंकार रूपाय सोमनाथायते नमः ।
रामेश्वराय शुचये नौमेशाय नमो नमः ॥२२॥

त्र्यंबकाय निरीहाय केदाराय नमो नमः ।
गंगाधराय कवये नागनाथायते नमः ॥२३॥

भस्मप्रियाय महेसेरष्मियाय नमो नमः ।
पूर्णाय भूतपतये सर्वज्ञाय दयालवे ॥२४॥

धर्माय धनदेशाय गज्चर्मांबराय च ।
भालनेत्राय यज्ञाय श्रशैलपतये नमः ॥२५॥

कृशानुरेतसे नीललोहिताय नमो नमः ।
अंधकासुर हंत्रेते पावनाय बलाय च ॥२६॥

चैतज्ञाय त्रिनेत्राय दक्षनाशकराय च ।
नमः सिंहस्रशिरसे जपरूपायते नमः ॥२७॥

सहस्रचरणायाथ योगीहृत्पद्मवासिने ।
सद्योजाताय वंद्याय सर्वदेवमयाय च ॥२८॥

आमोदाय प्रगल्भाय गायत्रीवल्लभाय च ।
व्योमाकाराय विप्राय नमो विप्रप्रियाय च ॥२९॥

अघोराय सुवेशाय श्वेत रूपायते नमः ।
विद्वत्तमाय चक्राय विश्वग्रासायतंटिने ॥३०॥

अधर्म शत्रवेजाय दुंदुभीमथनाय च ।
अजातशत्रवेतुभ्यं जगत्प्राणायते नमः ॥३१॥

नमो ब्रह्मशिरः छेत्रेपंचवक्त्राय खड्गिने ।
हरीकेशायविभवे पंचवर्णाय वह्निणे ॥३२॥

नमः पंचाक्षरायाथ गोवर्धनगताय च ।
प्रभवेजनजीवाय कालकूट विषादिने ॥३३॥

सिद्धेश्वराय सिद्धाय सहस्रवदनाय च ।
नमः सहस्रहस्ताय सहस्रनयनाय च ॥३४॥

सहस्र मूर्तयेतुभ्यं जिष्णवेजितशत्रवे ।
काशीनाथाय गोप्त्रेते नमस्ते विश्वसाक्षिणे ॥३५॥

हेतवे सर्व जीवानां पालकाय नमो नमः ।
जगसंहारकायाथ त्रिधावस्थायते नमः ॥३६॥

एकादश स्वरूपाय नमस्ते वह्नि मूर्तये ।
नरसिंह महादर्य घातिने शरभाय च ॥३७॥

भस्माभ्यक्ताय तीर्थाय जाह्नवीजनकाय च ।
देवदानवदैत्यानां गुरवेते नमो नमः ॥३८॥

दलितांजनभासाय नमोवायुस्वरूपिणे ।
नमः स्वेच्छा स्वरूपाया प्रसिद्धाय नमो नमः ॥३९॥

वृषध्वजाय गोष्णाय जगद्यंत्र प्रवर्तिने ।
अनाथाय प्रजोशाय विष्णुगर्वहराय च ॥४०॥

हरिविधात्रि कलहनाशकाय नमो नमः ।
दश हस्ताय पटवेगगनाय नमो नमः ॥४१॥

कैवल्यफल दात्रे ते परमाय नमो नमः ।
ज्ञानयज्ञाय गम्याय घंटाराव प्रियाय च ॥४२॥

पद्मासनाय स्पृष्टाय निर्वाणाय नमो नमः ।
अयोनये सुदेहाय ह्युत्तमाय नमो नमः ॥४३॥

अंतकालाधिपतये विशालाक्षायते नमः ।
कुबेरबंधवेतुभ्यं सोमाय सुखिने नमः ॥४४॥

अमृतेशाय सौम्याय खेचराय नमो नमः ।
प्रियंवदाय दक्षाय धन्विने विभवाय च ॥४५॥

गिरीशाय गिरीत्राय गिरिशंतायते नमः ।
पारिजाताय बृहते पंचयज्ञायते नमः ॥४६॥

तरुणाय विशिष्टाय बालरूपधराय च ।
जीवितेशाय पृष्टाय पुष्टानां पतये नमः ॥४७॥

नवहेत्यै हिरण्याय कंनिष्टाय नमो नमः ।
मध्यमाय विधात्रेते शूराय पशुगाय च ॥४८॥

आदित्यतापनाथाय पुण्यश्लोकायते नमः ।
महाह्लादय ह्रस्वाय वामनाय नमो नमः ॥४९॥

नमस्तत्पुरुषायाथ तनु हस्तायमायिने ।
नमो धूर्जटयेतुभ्यं जगदीशायते नमः ॥५०॥

जगन्नाथाय महते लीलाविग्रह धारिणे ।
अभयाय नमस्तुभ्यममराय नमो नमः ॥५१॥

आताम्राय नमस्तुभ्यं मक्षयाय नमो नमः ।
लोकाध्यक्षाय वैतुभ्यमनादि निधनाय च ॥५२॥

व्यक्तेतराय व्यक्ताय नमस्ते परमाणवे ।
लघवे स्थूल रूपाय नमः परशुधारिणे ॥५३॥

नमः खट्वांग हस्ताय नागहस्तायते नमः ।
वरदाभयहस्ताय घंटाहस्तायते नमः ॥५४॥

धस्मराय नमस्तुभ्यं अजिताय नमो नमः ।
अणिमादि गणेशाय पंचब्रह्ममयाय च ॥५५॥

पुरातनाय शुद्धाय बलप्रमथनाथ च ।
पुण्योदयाय पद्माय वियुक्ताय नमो नमः ॥५६॥

उदाराय विचित्राय विचित्रगतये नमः ।
वाग्विशुद्धाय चितये निर्गुणाय नमो नमः ॥५७॥

परमेशाय शेषाय नमः परपराय च ।
महेंद्राय सुशीलाय करवीर प्रियाय च ॥५८॥

महत्पराक्रमायाथ नमस्ते कालरूपिणे ।
विष्टस्श्रवसे लोक चूडारत्नायते नमः ॥५९॥

सम्राजेकल्पवृक्षाय वरेण्यायनटाय च ।
अनर्ध्याय वरेण्याय वज्ररूपायते नमः ॥६०॥

परमज्योतिषे पद्मगर्भाय सलिलाय च ।
तत्वाधिकाय सर्गाय नमो दीर्घायस्रग्विणे ॥६१॥

नमस्ते पांडुरोगाय घोराय ब्रह्मरूपिणे ।
अणवेनिष्कलायाथ सामगेय प्रियाय च ॥६२॥

नमो जयाय क्षेत्राय नमस्ते पुण्यमूर्तये ।
कलाधराय पूजाय पंचभूतात्मने नमः ॥६३॥

अनिर्विणाय तथ्याय पापनाशकराय च ।
विश्वतश्चक्षुषेकाययोगिनेनंतरूपिणे ॥६४॥

सिद्धसाधकरूपाय मेदिनीरूपिणे नमः ॥६५॥
श्रीवल्लभाय निधये स्थाणवे मधुराय च ।
उपाधिरहितायाथ नमः सुक्ततराशये ॥६६॥
नमो मुनीश्वरायाथ शिवानंदायते नमः ।
रिपुघ्नाय नमस्तेजोराशयेनुत्तमाय च ॥६७॥
भूतनाथाय मूलाय वातरोगायते नमः ।
नैष्कर्माय निरूपाय षट् चक्राय विशुद्धये ॥६८॥
चतुर्मूर्तिवपुस्थाय नमो बुद्धीन्द्रियात्मने ।
उपद्रवहरायाथ प्रियसंदर्शनाय च ॥६९॥
हिरण्ये बाहवे जीववरदाय नमो नमः ।
क्लेशाय भूत भृते भुवनेशायते नमः ॥७०॥
आदिदेवाय गर्भाय चंद्र संजीवनाय च ।
हराय बहुरूपाय प्रसिद्धाय नमो नमः ॥७१॥
आनंद भरितायाथ कूटस्थाय नमो नमः ।
नमोक्षत फलायाथ शाश्वताय विरागिणे ॥७२॥
यज्ञभोक्ते सुखेणाय दक्षयज्ञविघातिने ।
नमः सर्वात्मने तुभ्यं विश्वपालायते नमः ॥७३॥
विश्वगर्भाय गर्भाय देवगर्भायते नमः ।
संसारार्णवमग्नानां दुःख संसार हेतवे ॥७४॥
मुनिप्रियाय बीजाय मूल प्रकृतये नमः ।
समस्तबंधवे तेजोमूर्तयेते नमो नमः ॥७५॥
आश्रमस्थाय कालायाथ वर्णिनि सुंदराय च ।
मृगबाणार्पणायाथ शारदावल्लभाय च ॥७६॥

विचित्रमायिनेतुभ्यमलंकरिष्णवे नमः ।
बहिर्मुख महादर्पमथनाय नमो नमः ॥७७॥

नमोऽष्टमूर्तयेतुभ्यं निष्कलंकायते नमः ।
नमो हव्याय भोज्याय यज्ञनाथायते नमः ॥७८॥

नमो मेधाय मुख्याय विशिष्टाय नमो नमः ।
अंबिकापतयेतुभ्यं महदंतायते नमः ॥७९॥

सत्यप्रियाय सत्पाय प्रियनृत्यायते नमः ।
नृत्य तृप्ताय वेदित्रे मृग हस्तायते नमः ॥८०॥

अर्धनारीश्वरायाथ ऊवारयुतपाणये ।
वराहभेदिने तुभ्यं बहुरूपायते नमः ॥८१॥

महार्थाय सुतत्वाय कीर्तिस्थंभायते नमः ।
कृतागमाययायाथ वेदांतप निताय च ॥८२॥

अश्रोत्राय श्रुतिमते बहुश्रति धराय च ।
अघ्राणाय नमस्तुभ्यं गंधावग्रहकारिणे ॥८३॥

पादहीनाय वाहाय सर्वत्रगतये नमः ।
अक्षायजननेत्राय नमस्तुभ्यं चिदात्मने ॥८४॥

रसज्ञाय नमस्तुभ्यं रसभारहिताय च ।
अमूर्तायाथ मूर्ताय सदसत्पतये नमः ॥८५॥

जितेन्द्रियाय तथ्याय परज्योतिस्वरूपिणे ।
नमस्ते सर्वमर्त्यानामादिकर्त्रे दयालवे ॥८६॥

सर्गस्थिति विनाशानां कर्त्रेति प्रेरकाय च ।
नमोंतर्यामिणे सर्व हृदिस्थाय नमो नमः ॥८७॥

चक्रभ्रमणाकर्त्रेते पुरणाय नमो नमः ।
वामदक्षिण पार्श्वायलोकेश हरिशालिने ॥८८॥

नमः सकलकल्याणदायिने प्रसवाय च ।
स्वभावोदार धीराय सूत्रकारायते नमः ॥८९॥

विषयार्णवमग्नानां समुद्धरण सेतवे ।
अस्नेह स्नेहरूपाय वार्तार्तिकांतवर्तिने ॥९०॥

यत्रसर्वंयतः सर्वं सर्वंयत्र नमो नमः ।
नमोमहार्णवांथ भास्कराय नमो नमः ॥९१॥

भक्तिगम्याय भक्तानां सुलभाय नमो नमः ।
दुःप्रघर्षाय दुष्टानां विजयाय विवेकिनां ॥९२॥

अलौकिकाय लोकाय ह्यलोकाय नमो नमः ।
पूरयित्रे विशेषाय कुशलाय शुभाय च ॥९३॥

नमः कर्पूरगौराय सर्पहारायते नमः ।
नमः संसारपाराय कमनीयायते नमः ॥९४॥

वह्निदर्प विधाताय वायुदर्प विघातिने ।
जरातिगाय वीर्याय विश्वाय व्यापिने नमः ॥९५॥

सूर्यकोटिप्रकाशाय निष्क्रियाय नमो नमः ।
चंद्र कोटि सुशीलाय कपिलाय नमो नमः ॥९६॥

नमो गुरुस्वरूपाय निश्चषाय पराय च ।
नमः सत्य प्रतिज्ञाय नमस्ते सुसमाधये ॥९७॥

एक रूपाय शून्याय विश्वनाभिहृदाय च ।
सर्वोत्तमाय कालाय प्राणाय सुसदेनमः ॥९८॥

नमः पारायणायाथ चिन्मात्राय नमो नमः ।
ध्यान गम्याय ध्येयाय ध्यान रूपायते नमः ॥९९॥

नमस्ते शाश्वतैश्वर्य विभवाय नमो नमः ।
प्रतिष्टाय धर्मगोप्त्रे निधनायाऽग्रियाय च ॥१००॥

योगेश्वराय योगाय योगगम्यायते नमः ।
प्राणेश्वरायाथ सर्वशक्ति धराय च ॥१०१॥

धर्माधराय धन्याय पुष्कलाय नमो नमः ।
महेन्द्रो येंद्र चंद्रार्कानमिताय नमो नमः ॥१०२॥

महर्षि वंदितायाथ प्रकाशाय सुधर्मिणे ।
नमो हिरण्यगर्भाय नमोहिरण्मयाय च ॥१०३॥

जगद्बीजायहाराय सेव्यायक्रतवे नमः ।
आधिपत्याय कामाय वराय यशसे नमः ॥१०४॥

नमः प्रचेतसे ब्रह्मन् मयाय सकलाय च ।
नमस्ते रुक्मवर्णाय नमस्ते ब्रह्मयोनये ॥१०५॥

योगात्मने चिंतिताय दिव्य नृत्यायते नमः ।
जगतामेकबीजाय मायाबीजायते नमः ॥१०६॥

सर्वज्ञ संनिविष्टाय ब्रह्म चक्रभ्रमाय च ।
ब्रह्मानंदाय भवते ब्रह्मण्याय नमो नमः ॥१०७॥

भूमिभारार्तिसंहर्त्रे भवतारवयै नमः ।
हिरण्यगर्भ पुत्राणां प्राणसंरक्षणाय च ॥१०८॥

दुवाससे षड्विकार रहिताय नमो नमः ।
नमोदेहार्धकांताय षडूर्मिरहिताय च ॥१०९॥

पकृत्यै नवनाशाय ताम्राय परमेष्टिने ।
अनंतकोटि ब्रह्मांड नायकाय नमो नमः ॥११०॥

एकाकिने निर्मलाय प्रविणाय दमाय च ।
नमस्त्रैलोक्यनाथा य शिपिविष्टाय बंधवे ॥१११॥

त्रिविष्पृवेश्वरायाथ नमोव्याघ्रेश्वराय च ।
वीरेश्वराय दात्रे ते नमश्चंद्रेश्वराय च ॥११२॥

नागेश्वराय जन्यायन्यायनिर्वाहका य च ।
शरण्याय सुपुत्रायकालचक्र प्रवर्तिने ॥११३॥

विचक्षणाय दंष्ट्रायश्वेताश्वाय नमो नमः ।
नील जीमूत देहाय परमात्मज्योतिषे नमः ॥११४॥

शरणागत पालाय महाबलपराय च ।
सर्व पापहरायाथ महानादायते नमः ॥११५॥

कृष्णस्य जयदात्रेते बिल्वकेशायते नमः ।
दिव्यभोगाय दंडाय कोविदाय नमो नमः ॥११६॥

कामपालाय चित्राय विचित्राय नमो नमः ।
नमो मातामहायाथ नमस्ते मातरिश्वने ॥११७॥

निःसंगाय त्रिनेत्राय विघ्नेशायजयाय च ।
व्यास संमर्दनायाथ मध्यस्थाय नमो नमः ॥११८॥

अंगुष्टशिरसा लंकानाथ दर्पहराय च ।
व्याघ्रपुर निवासाय नमः सर्वेश्वराय च ॥११९॥

नमः परावरेशाय जगस्थावर मूर्तये ।
नमोप्यनुपमेया यशार्ङ्गिणे विष्णु मूर्तये ॥१२०॥

नारायणाय वामाय सुदीप्ताय नमो नमः ।
नमो ब्रह्मांड मालाय गोधराय वरूथिने ॥१२१॥

घंटानादाय सूत्राय नमः पातालवासिने ।
नमस्ताराधिनाथाय वागीशाय नमो नमः ॥१२२॥

सदाचार गौराय पुराण पुरुषाय च ।
अतर्क्याया प्रमेयाय प्रमाणाय नमो नमः ॥१२३॥

कलिग्रासाय भक्तानां भुक्तिमुक्ति प्रदायिने ।
संसार मोचकायाथ वर्णिनिलिंगरूपिणे ॥१२४॥

सच्चिदानंद रूपारूपाय पापराशीहराय च ।
गजारये विदेहाय त्रिलिंगरहिताय च ॥१२५॥

अचिंत्य शक्तये लंघ्य शासनायाच्युताय च ।
नमो राजाधिराजाय चैतन्य विषयाय च ॥१२६॥

नमः शुद्धात्मने ब्रह्मज्योतिषे स्वस्तिदाय च ।
मयोभव्येच दुर्ज्ञाय समर्थायच यज्विने ॥१२७॥

चक्रीश्वरायरुचये नमोनक्षत्रमालिने ।
अनर्थनाशकायाथ भस्मलेपकराय च ॥१२८॥

सदानंदाय विदुषे सुगुणाय विरोधिने ।
दुर्गमायशुभांगाय मृगव्याधायते नमः ॥१२९॥

प्रियाय धर्मधाम्नेते प्रयोगाय विभागिने ।
आद्याया मृतपायाथ सोमपाय तपस्विने ॥१३०॥

नमो विचित्र वेषाय पुष्टि संवर्धानाय च ।
चिरंतनाय धनुषेस्थविराय ध्रुवाय च ॥१३१॥

निर्मायायाग्रगण्याय व्योमातीतायते नमः ।
संवत्सराय लोप्याय स्थानदाय स्थविष्णवे ॥१३२॥

व्यवसाय फलांताय महाकर्त्रे प्रियाय च ।
गुणत्रय स्वरूपाय नमोसिद्ध स्वरूपिणे ॥१३३॥

नमो नमः स्वरूपाय स्वछाय पुरुषाय च ।
कालात्मने सुरूपाय नमो ब्रह्मांडरूपिणे ॥१३४॥

अनित्यनित्यरूपाय तदेतर्वर्त्तिनमः ।
नमस्तीर्थाय कूल्याय पर्णाय छटवे नमः ॥१३५॥

पंचतन्मात्ररूपाय पंचकर्मेन्द्रियात्मने ।
विश्रृखलायदर्पाय नमस्ते विषयात्मने ॥१३६॥

अनवद्याय शास्त्राय स्वतंत्रायामृताय च ।
नमः प्रौढाय प्राज्ञाय योगारूढायते नमः ॥१३७॥

मंत्रज्ञाय प्रभावाय प्रदीप विमलाय च ।
विश्वावासाय दक्षाय वेदनिश्वसिताय च ॥१३८॥

यज्ञांगाय सुवीराय नाग चूडायते नमः ।
व्याधाय बाण हस्ताय स्कंदाय पक्षिणे नमः ॥१३९॥

क्षेत्रज्ञाय रहस्याय स्वच्छाय च वरीयसे ।
गहनाय विरामाय सिद्धांताय नमो नमः ॥१४०॥

महिधरायहोत्रेते वटवृक्षायते नमः ।
ज्ञानदीपाय दुर्गाय सिद्धांतैर्निश्चिताय च ॥१४१॥

श्रीमते मुक्ति बीजाय कुशलाय विवासिने ।
प्रेरकाय विशोकाय हविर्द्धानायते नमः ॥१४२॥

गंभीराय महायाय भोजनाय सुभोगिने ।
महायज्ञायतीक्ष्णाय नमस्ते भूतचारिणे ॥१४३॥

नमः प्रतिष्ठितायाथ महोत्साहायते नमः ।
परमार्थाय शिशवै प्रांशवेचक्रपालिने ॥१४४॥

सहजाय गृहास्थाय संध्यानाथाय विष्णवे ।
षङ्भिः संवूजितायाय विदला सुरघातिने ॥१४५॥

कामपालाय योग्याय कामेशाय किरीटिने ।
अमोघ विक्रमायाथनग्रायदल घातिने ॥१४६॥

संग्रामाय नरेशाय शुचिहास्यायते नमः ।
भूतिप्रियाय भूम्नेते शेनाय च तुराय च ॥१४७॥

मनुष्य बाह्यगतये कृतज्ञाय शिखंडिने ।
निर्लयाय जटार्द्राय महाकालाय मेरवे ॥१४८॥

नमो विरूपरूपाय शक्तिगम्यायते नमः ।
नमः सर्वायच सदा सचराय व्रताय च ॥१४९॥

नमो भक्तिः प्रियायाथ श्वेतरक्षा पराय च ।
सुकुमार महापापहराय रथिने नमः ॥१५०॥

ख्याताय जितविश्वाय गोकर्णाय सुचारवे ।
श्रोत्रियाय वदान्याय दुर्लभाय कुटुंबिने ॥१५१॥

नमस्ते धर्मराजाय धनाध्यक्षाय सिद्धये ।
महाभूताय कल्पाय कल्पना रहिताय च ॥१५२॥

विरजाय सुगंधाय नमोविश्वंभराय च ।
भवातीताय यष्टाय नमस्ते सामगाय च ॥१५३॥

चिन्मयाय नमः शुक्ल ज्योतिषे क्षेत्रगाय च ।
अद्वैताय द्वितीयाय कल्पराजाय भोगिने ॥१५४॥

सर्वभोग समृद्धाय शांबराय नमो नमः ।
नमस्ते स्वप्रकाशाय स्वच्छंदाय सुतंतवे ॥१५५॥

सर्वज्ञ मूर्तयेतुभ्यं हिरण्य रेतसे नमः ।
शारदाय सुशीलाय कौशिकाय धनाय च ॥१५६॥

अभिरामाय कल्पाय व्यालकल्पायते नमः ।
अरिष्ट मथनायाथ सुप्रतिकायंते नमः ॥१५७॥

आशवेब्रह्मगर्भाय वरुणायाद्रये नमः ।
नमः कालाग्नि रुद्राय श्यामाय सुजनाय च ॥१५८॥

अहिर्बुध्नायाजराय गुह्येशाय सुशांतये ।
नमः समयनाथाय समयाय गुहाय च ॥१५९॥

निल्लंघ्याय नमस्तुभ्यं छंदः साराय दंष्ट्रिने ।
ज्योतिर्लिंगाय मित्राय जगत्सुहितकारिणे ॥१६०॥

नमः कारुण्य निधये श्लोक जयशालिने ।
ज्ञानोदयाय बीजाय जनविश्रांत हेतवे ॥१६१॥

अवधूताय शिष्टाय छंदसां प्रभवे नमः ।
नमः फेन्याय गुह्याय सर्वबंधविमोचने ॥१६२॥

उदार कीर्तये शश्वत् प्रसन्न वदना य च ।
वसवे वेदकाराय नमो भ्राजिष्णु जिष्णवे ॥१६३॥

चक्रिणे देवदेवाय गदाहस्ताय पुत्रिणे ।
नमस्ते पारिजाताय गणाधिपतये नमः ॥१६४॥

सर्वशाखाधिपतये प्रजेशाय च ते नमः ।
सूक्ष्मप्रमाण भूताय सुरपार्श्वगताय च ॥१६५॥

अशरीराय शुक्राय सर्वांतर्यामिणे नमः ।
सुकेशाय सुपुष्पाय श्रुतये पुष्पमालिने ॥१६६॥

मुनिध्येयाय मुनये बीजस्थाय मरीचये ।
चामुंडा जनकायाथ नमस्ते कृत्ति वाससे ॥१६७॥

व्याप्तकेशाय योग्याय चर्मपीठायते नमः ।
महावीर्याय दीप्ताय बुद्धायाशतये नमः ॥१६८॥

शिष्टेष्टाय मधवते केतवे करणाय च ।
कारणाय भगवते बाणदर्पहराय च ॥१६९॥

अतीन्द्रियाय रम्याय जनानंद कराय च ।
सदाशिवाय धौम्याय चिंत्याय चंद्रमौलिने ॥१७०॥

नमस्ते जातुकर्ण्याय सूर्याध्यक्षायते नमः ।
ज्योतिषे कुंडलीशाय वरदायाभयाय च ॥१७१॥

वसंताय सुरभये जयारिमथनाय च ।
प्रेतपुरंजयायाथ पृषदश्वायते नमः ॥१७२॥

रोचिष्णवे सुरजितेश्वेत पीतायते नमः ।
नमस्ते चंचरीकाय तमिस्रमथनाय च ॥१७३॥

प्रमाथिने निदाधाय चित्रगर्भायते नमः ।
शिवालयाय स्तुत्याय तीर्थदेवायते नमः ॥१७४॥

निरवद्याय दानाय विचित्रं शक्तये नमः ।
नमस्तल्पाय महसेवित्ताय तपसे नमः ॥१७५॥

विक्रमाय स्वतंत्राय स्वतंत्रगतये नमः ।
अहंकार स्वरूपाय मेघाधिपतये नमः ॥१७६॥

अपाराय तत्व विदेक्षय धीरायते नमः ।
पंचास्याय वदान्याय विष्णुप्राणेश्वराय च ॥१७७॥

अगोचराय सूक्ताय ज्ञेयाय बहुवाग्नये ।
स्वल्पाय पद्मगर्भाय नमस्ते जमदग्नये ॥१७८॥

अनादृताय मुक्ताय मातृकायतये नमः ।
नमस्ते बीजकोशाय तीव्रानंदाय मुक्तये ॥१७९॥

नमस्ते विश्वदेवाय शांतरागायते नमः ।
विलोचनायतोयाय हेमगर्भायते नमः ॥१८०॥

अनाद्यंताय चंडाय मनोनाथायते नमः ।
ज्ञानस्कंधाय दृष्टाय कपिलाय महर्षये ॥१८१॥

नमःस्त्रिकाग्नि कालाय देवसिंहायते नमः ।
नमस्ते मणिपूराय चतुर्वेदायते नमः ॥१८२॥

स्वभासाय सुभासाय ह्यंतर्यायते नमः ।
नमस्ते शिवधर्माय महाधर्मायते नमः ॥१८३॥

प्रसन्नाय नमस्तुभ्यं सर्वांतर्ज्योतिषे नमः ।
स्वयंभु वेकलेशाय क्षराक्षराय मन्महे ॥१८४॥

॥ श्री सदाशिव उवाच ॥

जयंतु मम भोदेवानाम्नां दशशतिमिमां ।
मम चातिप्रियकरी महामोक्ष प्रदायिनी ॥१८५॥

संग्रामे जयदात्रीं च सर्वसिद्धिमयीं शुभां ।
यः परे छृणुयां द्वापि सर्व पापैः प्रमुच्यते ॥१८६॥

पुत्रकामो लभेत्पुत्रं राज्यकामस्त राजतां ।
प्राप्नुयात्परमा भक्त्या धनं धान्यादिकं बहु ॥१८७॥

शिवालये नदीतीरेऽश्वस्थमूले विशेषतः ।
प्रजयेसिद्धिदां देवाः शुचौदेशे शमीतले ॥१८८॥

धनकामेन जुह्यात् धृताक्तै बिल्वपत्रकैः ।
मोक्षकामेन गव्येन घृतेन प्रतिनामतः ॥१८९॥

पुत्रकामेन जुह्यात् त्तिलाज्येन तथांधसा ।
आयुः कामेन जुह्यादाज्येन मधुना तथा ॥१९०॥

मत्समीपे प्रदोषे च स्पृष्टवा भक्त्या जपं स्तथा ।
जीवन् सरूपतां प्राप्य क्रमात्सायुज्यमाप्नुयात् ॥१९१॥

कालोपिजनशास्ता हिममभक्तं नपश्यति ।
अहं स्वामी सुरास्तस्य नेष्यामि मम तुस्थलं ॥१९२॥

त्रिसंध्यं प्रजपेद्भक्त्यावसरं नियमान्वितः ।
मच्चितोमन्मना भूत्वासर्वरोगैः प्रमुच्यते ॥१९३॥

रुद्र पाठेनयत्पुण्यं यत्पुण्यं वेदपाठतः ।
तत्सर्वं प्राप्यतेपुंभिरेकाग्र मनसामराः ॥१९४॥

कन्याकोटि प्रदातस्य यत्फलं लभते नरः ।
तत्फलं लभते सम्यक् नाम्नां दशशती जपेत् ॥१९५॥

कपिलाशतदानस्य तत्फलं पठनाद्भवेत् ।
अश्वमेघ सहस्रस्य यत्फलं लभते नरः ॥१९६॥

गायः श्रृणोति महाविद्यां श्रावयेद्वापि भक्तितः ।
सोपिमुक्तिमवाप्नोति यत्र गत्वा न शोचते ॥१९७॥

यक्षराक्षसवैताल ग्रहकूष्मांड भैरवाः ।
पठनादस्य नश्यंति जीवेच्चशरदांशतं ॥१९८॥

ब्रह्महत्यादि पापानां नाशः स्याच्छ्रवणेन च ।
किपुनः पठनादस्य मुक्तिस्यादन पायिनी ॥१९९॥

इत्युक्त्वा स महादेवो भगवान् परमेश्वरः ।
पुनरथाह भगवान् कृपया परयायुतः ॥२००॥

दीयतां ममभक्तेभ्यो मदुक्तं भवघातनं ।
इत्युक्त्वान्तर्दधेदेवः परमानंद रूपवान् ॥२०१॥

॥ श्री ब्रह्म उवाच ॥

एतदेव पुरारामोलब्ध्वान् कुंभ संभवात् ।
अरण्ये दंडकारण्ये तु प्रजजापरधूद्वहः ॥२०२॥

नित्यं त्रिंषवणस्नायीत्रि संध्यासुस्मरान् शिवं ।
तदासौममदेवोपि प्रत्यक्षं प्राहराघवं ॥२०३॥

इदं पाशुपते दिव्यं प्रगृहाण रघूद्वह ।
एतदा साद्यंपौलस्त्यं जहिमा शोक मर्हसि ॥२०४॥

तदा प्रभृतिभूदेवाः प्रजपामिसुभक्तितः ।
गृण्हन्तु परया भक्त्या भवंतः सर्वएवहि ॥२०५॥

॥ श्री व्यास उवाच ॥

तस्तेऋषयर्स्वजगृहु र्मुनिपुंगवाः ।
सहस्रनामसद्धियां भक्तियुक्तेन चेतसा ॥२०६॥

एतद्वः कथितं सर्वहितार्थंमुनि पुंगवाः ।
गृण्हन्तु मम वाक्येन मुक्तिं प्राप्स्यथ निष्चितम् ॥२०७॥

भवद्धिरात्म शिष्येभ्यो दीयतामि दमादरात् ।
नाम्नां सहस्रमेतद्धि-लिखितं यन्निकेतने ॥२०८॥

अविमुक्तं तु तद्गेहं नित्यं तिष्ठति शंकरः ।
अनेनमंत्रितं भस्म खलु दुष्ट विधातसं ॥२०९॥

पिशाचस्य विनाशाय जप्तव्य मिदमुत्तमं ।
नाम्नां सहस्रेणानेन समंकिचिन्न विद्यते ॥२१०॥

इति क्षीपद्मपुराणे उत्तर भागे बिल्वकेश्वर माहात्म्ये कृष्ण मार्कंडेय संवादे शिवसहस्रनाम स्तोत्र संपूर्णम् ॥

■

३

अथ श्री शिवरहस्यान्तर्गतं

श्रीशिवसहस्रनामस्तोत्रम्

ॐ हिरण्यबाहुः सेनानीर्दिक्पति स्तरुराड्वरः ।
हरिकेशः पशुपतिर्महान् सस्पिंजरोमृडः ॥१॥

विव्याधीबभ्लुशः श्रेष्ठः परमात्मा सनातनः ।
सर्वान्तराड्जगत्कर्ता पुष्टेशो नंदीकेश्वरः ॥२॥

आततायी महारुद्रः संसारास्त्रः सुरेश्वरः ।
उपवीतिर्हरेत्यात्मा क्षेत्रेशो वननायकः ॥३॥

रोहितः स्थपतिः सूतोवाणिजोमंत्रिरुन्नतः ।
कक्षेशोहुतभुग्देवो भुवंति वारि वस्कृतः ॥४॥

उच्चैर्घोषो घोररूपः पत्तीशः पाशमोचकः ।
ओषधीशः पंचवक्त्रः कृत्स्नवीतो भयानकः ॥५॥

सहमानः स्वर्णरेतानिर्व्याधि निरुपप्लवः ।
आव्याधिनीशः ककुभो निषंगी स्तेन रक्षकः ॥६॥

मंत्रात्मा तस्कराध्यक्षो वंचकः परिवंचकः ।
अरण्येशः परिचरो विचेरु स्नायुरक्षकः ॥७॥

प्रकृतेशो गिरिचरः कुलुश्रेष्टो गुहेष्टदः ।
भवः शर्वो नीलकण्ठः कपर्दी त्रिपुरान्तकः ॥८॥

व्युप्तकेशो गिरिशयः सहस्राक्षः सहस्रपात् ।
क्षिपिविष्ट चन्द्रमौलिर्हस्वो मीढुष्टमोऽनघः ॥९॥

वामनो व्यापकः शूलीवर्षीयान जडोऽनणुः ।
उर्व्यस्तूम्र्योग्रियः शीभ्यः प्रमथः पावकाकृतिः ॥१०॥

अचरस्तारकस्तारो वस्वन्योऽनंत विग्रहः ।
द्वीज्यः श्रोतस्य ईशानो धुर्योगव्ययनोन्मयः ॥११॥

पूर्वजो परजो ज्येष्ठः कनिष्ठो विश्वलोचनः ।
अप्रगल्भो मध्यमोर्म्यो जघन्यो बुध्नियः शुभः ॥१२॥

प्रतिसर्योऽनंतरूपः सोम्योयाम्यः सुराश्रयः ।
स्वल्पोवर्योऽक्षयः क्षेम्यः श्लोक्ये पथ्योनभोऽग्रणीः ॥१३॥

वन्यो वसान्यः पूतात्मा श्रवः कक्ष्यः प्रतिश्रवः ।
आशुषेणो महासेनो महावीरो महारथः ॥१४॥

शूरोऽति धातुको वर्मीविल्मिरुद्यतः ।
श्रुतसेनः श्रुतः साक्षी कवची वशकृद्वशी ॥१५॥

आहनन्योऽनन्यनाथो दुन्दुभ्योऽरिष्ट नाशकः ।
धृष्णुः प्रमृश इड्यात्मा वदान्यो वेदसम्मतः ॥१६॥

तीक्ष्णेषुपाणिः प्रहितः स्वायुधः शस्त्रवित्तमः ।
सुधन्वासुप्रसन्नात्मा विश्ववक्त्रः सदागतिः ॥१७॥

श्रुतः पथ्यो विश्वबाहुः काद्योनीयः शुचिस्मितः ।
सुद्युः सरस्योवैशंतोनाद्यः कूप्योऋषिर्यजुः वर्ष्योवर्षस्य कूमार कुशलोमलः ॥१८॥

मेध्योऽवद्यो दोहराराध्यो निर्द्वंद्वोह सहर्षन्नः ।
इन्द्रियः कुध्रशयनोजातूकर्ण्यः पुरुष्टुतः ॥१९॥

आतप्यो वायुरजरोवासः कात्यायनीप्रियः ।
वास्तव्यो वास्तुपोरेभ्यो विश्वमूर्धावसुप्रदः ॥२०॥

सोमस्ताम्रोऽरुणः शंगोरुद्रः सुखकरः सुहृत् ।
उग्रोऽनुग्रो भीमकर्मा भीमो भीमपराक्रमः ॥२१॥

अये वधोह नीयात्मा हंताहूरेवधोवधः ।
शंभुर्मयो भवोनित्यः शंकरः कीर्तिसागरः ॥२२॥

मयस्करः शिवतारः खं उपर्श्रुरजः शुचिः ।
तीर्थ्यः कूल्योमृताधीशः पार्य्योवार्योमृताकरः ॥२३॥

शुद्धः प्रतारणो मुख्यः शुद्धपाणिरलोलुपः ।
उच्चउत्तरणस्तार्यस्तार्यज्ञस्तार्यहृद्गातः ॥२४॥

आतार्यः सारभूतात्मा सारग्राही दुरत्ययः ।
मालाघोमोक्षदः पथ्योऽनर्थहासत्यसंग्रहः ॥२५॥

शिष्यः फेन्यः प्रवाह्योऽथः सीकत्यः सैकताश्रयः ।
इरिण्यो ग्रामणीः पुण्यः शरण्यः शुद्धशासनः ॥२६॥

वरेण्यो यज्ञपुरुषोयज्ञेशो यज्ञनायकः ।
यज्ञकर्त्तायज्ञभोक्ता यज्ञविघ्नविनायकः ॥२७॥

यज्ञकर्म फलाध्यक्षो यज्ञमूर्त्तिरनातुरः ।
प्रपथ्यः किंशिलोगेह्यो गृह्यस्तल्प्यो धनाकरः ॥२८॥

पुलस्त्य क्षपणोगोष्ठ्यो गोविह्रोवीतसक्रियः ।
हृदय्योहृदकृद् हृद्योगह्वरेष्टः प्रभाकरः ॥२९॥

निवेष्यो नियतोयंतापर्यासव्यः सुह्मतापनः ।
शुष्क्यो हरित्यः पूतात्मा रजस्यः सात्विकप्रियः ॥३०॥

लोप्योजप्यः पर्णशद्यः पुण्यः पूर्णः पुरातनः ।
भूतोभूतपतिर्भूपोभूधरो भूधरायुधः ॥३१॥

भूतसंघोभूतमूर्त्तिर्भूतिहाभूतिभूषणः ।
मदनोमार्धकोमाद्योमदहा मधुरप्रियः ॥३२॥

मधुर्मधुकरः क्रूरोमधूरो मदनांतकः ।
निरंजनो निराधारो निर्लिप्तो निरूपाधिकः ॥३३॥

निष्प्रपंचो निराधारो निरीहो निरुपद्रवः ।
सत्वः सत्वगुणोपेतः सत्ववित्सत्ववित्प्रियः ॥३४॥

सत्वनिष्ठः सत्वमूर्तिः सत्वेशः सत्ववित्तमः ।
समस्त जगदाधारः समस्त गुणसागरः ॥३५॥

समस्त दुःखविध्वंसी समस्तानंदकारणः ।
रुद्राक्षमालाभरणो रुद्राक्षप्रिय वत्सलः ॥३६॥

रुद्राक्षवक्षो रुद्राक्षरुपो रुद्राक्षभक्षकः ।
विश्वेश्वरो वीरभद्रः सम्राद्‌दक्ष मखांतकः ॥३७॥

विश्वेश्वरो विघ्नकर्त्ता गुरुर्देव शिखामणिः ।
भुजगेन्द्र लसत्कंठो भुजंगा भरणप्रियः ॥३८॥

भुजङ्गविलसत्कर्णो भुजंगा वलयावृतः ।
मुनिवंद्योमुनिः श्रेष्ठोमुनिवृंद निषेवितः ॥३९॥

मुनिहृत्पुंडरीकस्थो मुनि संघैकजीवनः ।
मुनिमृग्यो वेदमृग्यो मृगहस्तो मृगेश्वरः ॥४०॥

मृगेन्द्र चर्मवसनो नरसिंह निपतानः ।
मृत्युंजयो मृत्यु मुत्युरप मृत्यु विनाशकः ॥४१॥

दुष्टमृत्यु रदुष्टेष्टोमृत्यु ह्यमृत्यु पूजितः ।
उर्ध्वो हिरण्यः परमोनिधनो निधनाद्धिपः ॥४२॥

यजुर्मूर्त्तिः साममूर्तिऋङ्मूर्तिवर्जितः ।
व्यक्तोऽव्यक्ततमो व्यक्तो व्यक्ता व्यक्ततमोजवी ॥४३॥

लिंगमूर्त्तिरलिंगात्मालिंगालिंगात्मविग्रहः ।
ग्रहोग्रहोग्रहाधारोग्रहाकारो ग्रहेश्वरः ॥४४॥

ग्रह कृद्ग्रह भिद्ग्राहीग्रहाग्रह विलक्षणः ।
कल्पाकारः कल्पकर्त्ता कल्परक्षणतत्परः ॥४५॥

कल्पाकल्पाकृतिः कल्पनाशकः कल्पकल्पकः ।
परमात्माप्रधानात्मा प्रधानः पुरुषः शिवः ॥४६॥

वेद्योवैद्योवेदवेद्यो वेदवेदांत संस्तुतः ।
वेदवक्त्रो वेदजिह्वो विजिह्वो जिह्वनाशनः ॥४७॥

कल्याणरुपः कल्याणः कल्याणगुणसंश्रयः ।
भक्त कल्याणदोभक्त कामधेनुः सुराधिपः ॥४८॥

पावनः पावको वामो महाकालोमदापहः ।
घोरपातकदावाग्निर्दवभस्मकणप्रियः ॥४९॥

अनंतसोम सूर्याग्निमंडल प्रतिमप्रभः ।
जगदेकप्रभुः स्वामी जगद्वंद्यो जगन्मयः ॥५०॥

जगदानंदयो जन्मजरामरणवर्जितः ।
खट्वांगी नीतिमान्सत्योदेवतात्मात्म संभव ॥५१॥

कपाल मालाभरणः कपाली विष्णुवल्लभः ।
कमलासनः कालाग्निः कमलासनपूजितः ॥५२॥

कालाधीश त्रिकालज्ञो दुष्टावग्रहवारकः ।
नाद्यकर्ता नटवरो महानाद्य विशारदः ॥५३॥

विंशदरूपधरोऽधीशो विराद्‌वृषभवाहनः ।
वृषाङ्को वृषभाधीशो वृषात्मा वृषभध्वजः ॥५४॥

महोन्नतो महाकायो महावक्षो महाभुजः ।
महास्कंधो महाग्रीवो महद्वक्त्रो महाच्छिराः ॥५५॥

महाहनो र्महादृंष्ट्रो महदोष्टो महोदरः ।
सुंदर सुनयनः सुललाटः सुकंधरः ॥५६॥

सत्यवाक्यो धर्मवक्ता सत्यज्ञः सत्यवित्तमः ।
धर्मवान् धर्मनिपुणो धर्मोधर्मप्रवर्तकः ॥५७॥

कृतज्ञः कृतकृत्यात्मा कृतकृत्यः कृतागमः ।
कृत्यवित्कृत्यविद्श्रेष्ठः कृतज्ञः प्रियकृत्तमः ॥५८॥

व्रत कृद् व्रतविद्श्रेष्ठो व्रतविद्वान् महाव्रता ।
व्रतप्रियों व्रताकारो व्रताधारो व्रतेश्वरः ॥५९॥

अतिरागी वीतरागो रागहेतु र्विकारवित् ।
रागघ्रोरागि शमनो रागदोरागिरागवित् ॥६०॥

विद्वान्विद्वत्तमो विद्वज्जनमानससंश्रयः ।
विद्वज्जनाश्रयो विद्वज्जनस्तव्य पराक्रमः ॥६१॥

नातिकृन्नीतिविन्तीति प्रदातानीतिवित्प्रियः ।
विनीतवत्सलो नीति स्वरूपो नीतिसंश्रयः ॥६२॥

क्रोधविक्रोधलः क्रोधिजनविक्रोधरूपधृक् ।
क्रोधदः क्रोधहा क्रोधीजन क्रोध परायणः ॥६३॥

गुणवान गुणवित्श्रेष्ठो वीर्यविद्वीर्यसंश्रयः ।
वीर्याकारो वीर्यकरो वीर्यहा वीर्यवर्धकः ॥६४॥

कालवित्काल कृत्कालो बलकृत् बलविद्बली ।
मनोन्मनो मनोरूपो बल प्रमथनो बलः ॥६५॥

विद्याप्रदाताविद्वेशो विद्यामात्रैकसंश्रयः ।
विद्याकारो महाविद्यो विद्यावेद्यो विशारदः ॥६६॥

वसंतकृद्वसंतात्मांवसंतेशो वसंतदः ।
ग्रीष्मात्माग्रीष्मकृद्ग्रीष्मवर्धको ग्रीष्मनायकः ॥६७॥

प्रावद्वकृत्त्रा रजकारः प्रावट्काज प्रवर्तकः ।
प्रावट्प्रवर्धकः प्रारणनाथ प्रावड्विनाशकः ॥६८॥

शरदात्मा शरदहेतुः शरत्काल प्रवर्तकः ।
शरन्नाथः शरत्कालनाशकः शरदाश्रयः ॥६९॥

हिमस्वरूपो हिमदो हिमहा हिमनायकः ।
शौशिरात्मा शौशिरेशः शौशिरर्त्तुप्ररर्तकः ॥७०॥

प्राच्यात्मा दक्षिणाकारः प्रतीच्यात्मोत्तराकृतिः ।
ऊ र्ध्वाधन्यदिगाकारोनानादेशैकनायकः ॥७१।

सर्वपक्षिमृगाकारः सर्वपक्षिमृगाधिपः ।
सर्वपक्षि मृगाधारो मृगाद्युत्पत्तिकारणः ॥७२॥

जीवाध्यक्षो जीववंद्यो जीवविज्जीवरक्षकः ।
जावकृज्जीवहा जीवजीवनो जीवसंश्रयः ॥७३॥

ज्योतिस्वरूपो विश्वात्मा विप्रनाथो वियत्पत्तिः ।
वज्रात्मा वज्रहस्तात्मा वज्रेशोवज्रभूषितः ॥७४॥

कुमार गुरुरीशानो गणाध्यक्षो गणाधिपः ।
पिनाकपाणिः सूर्यात्मा सोम सूर्याग्निलोचनः ॥७५॥

अरोषपापरहितो दांतोदमयिता दमः ।
ऋषिः पुराणपुरुषः पुरुषेशः पुरंदरः ॥७६॥

कालाग्निरुद्रः सर्वेशः शमरुपः शमेश्वरः ।
प्रलयानलकृद्धव्यः प्रलयानलनाशकः ॥७७॥

त्रियंबकोऽरिषद्वर्गनाशको धनदप्रियः ।
अक्षोभ्यः क्षोभरहितः क्षोभदः क्षोभनाशकः ॥७८॥

सदंभो दंभरहितो दंभदो दंभनाशकः ।
कुन्देन्दु शंख धवलो भस्मोधूलितविग्रहः ॥७९॥

भस्मधारणहृष्टात्मा तुष्टः पुष्टोऽरिस्नुदनः ।
स्थाणुर्दिगंबरो भर्गोभग नेत्रभिदुज्वलः ॥८०॥

त्रिकाग्निकालः कालाग्निरद्वितीयो महायशाः ।
सामप्रियः सामवेत्ता सामगः सामगप्रियः ॥८१॥

धीरोदांतो महाधीरो धैर्यदोधैर्यवर्धकः ।
लावण्यराशि सर्वज्ञः सुबुद्धिर्बुद्धिमध्वरः ॥८२॥

तुंबवीणः कंबुकंठः शंबरारिर्निकृंतन ।
शार्दूलचर्मवसनः पूर्णानंदो जगत्प्रियः ॥८३॥

जयप्रदो जयाध्यक्षो जयात्मा जयकारणः ।
जंगमाजंगमाकारो जगदुत्पत्तिकारणः ॥८४॥

जगद्रक्षा करोवश्यो जगत्प्रलयकारणः ।
पूषदंतभिदुत्कृष्टः पंचयज्ञः प्रभंजनः ॥८५॥

अष्टमूर्ति र्विश्वमूर्तिरतिमूर्तिरमूर्तिमान् ।
कैलासशिखरावासः कैलास शिखरप्रियः ॥८६॥

भक्तकैलासदः सूक्ष्मोवर्मज्ञः सर्वशिक्षकः ।
सोमः सोमकलाकारो महातेजा महातपाः ॥८७॥

हिरण्यश्म श्रुरानंदः स्वर्णकशः सुवर्णदृक् ।
ब्रह्माविश्वसृड्वीसोमोचको बंधवर्जितः ॥८८॥

स्वतंत्रः सर्वतंत्रात्मा द्युतिमानमितप्रभः ।
पुष्कराक्षः पुण्यकीर्तिः पुण्यश्रवणकीर्तनः ॥८९॥

पुण्यकीर्तिः पुण्यदाता पुण्यापुण्यफलप्रदः ।
सारभूतः स्वरमयोरसभूतो रसाश्रयः ॥९०॥

ॐकारः प्रणवोनादः प्रणतार्तिप्रभंजनः ।
निकटस्थोऽति दुरस्थोवशी ब्रह्मांडनायक ॥९१॥

मंदारमूल निलयोमंदार कुसुमावृतः ।
वृंदारकप्रियतमो वंदारकवरार्चितः ॥९२॥

श्रीमाननंतकल्याण परिपूर्ण महोदयः ।
महोत्साहो विश्वभोक्ता विश्वाशा परिपूरकः ॥९३॥

सुलभोऽसुलभो लाभालाभप्रवर्धकः ।
लाभात्मालभदो वक्ताद्युतिमाननसूयकः ॥९४॥

ब्रह्मचारी दृढाचारी देवसिंहो धनप्रियः ।
देवेज्योदेवदेवेशो देवदेवोत्तमोत्तमः ॥९५॥

बीजराजो बीजहेतु र्बीजदोबीजवृद्धिदः ।
बीजाधारो बीजरूपोनिर्बीजो बीजनाशकः ॥९६॥

परापरेशः परदः पिंगलोयुग्मलोचनः ।
पिंगलाक्षः सुरगुरुर्गुरुः सुरगुरुप्रियः ॥९७॥

युगावहो युगाधीशो युगकृद्युगनाशकः ।
कर्पूरगौरो गौरीशो गौरीगुरु गुहाश्रयः ॥९८॥

धूर्जटिः पिंगलजटोजटामंडलमंडितः ।
मनोजवो जीवहेतुरंधकासुरसूदन ॥९९॥

लोकबंधुः कलाधारः पांडुरः प्रमथाधिपः ।
अव्यक्तलक्षणोयोगीशो योगपुंगवः ॥१००॥

भूतावासो जनावासः सुरावासः सुमंगलः ।
भववैद्यो योगीवैद्यो योगिसिंहहृदाश्रयः ॥१०१॥

उत्तमोऽनुत्तमः शक्तः कालकूटविषादनः ।
प्राकाम्पः कमनीयात्मा शुभः सुंदरविग्रहः ॥१०२॥

भक्तकल्पतरुः स्तोतास्तुत्यः सुरगुरुप्रियः ।
अप्रमेय गुणाधारो वेदकृद्वेदविग्रहः ॥१०३॥

कीर्त्याधारः कीर्तिकरः कीर्तिहितुरहेतुकः ।
अप्रधृष्यः शांतभद्रः कीर्तिस्तंभो मनोमयः ॥१०४॥

भूष्ययोऽन्नमयो भूकृन्महेश्वासो महीतनु ।
विज्ञानमय आनंदमयः प्राणमयोऽन्नदः ॥१०५॥

सर्वलोकमयो यष्टा धर्माधर्म प्रवर्तकः ।
अनिर्वण्यों गुणग्राही सर्वधर्मफलप्रदः ॥१०६॥

दयासुधार्द्रनयनो निराशीरपरिग्रहः ।
परार्थवृत्तिर्मधुरोमधुर प्रियदर्शनः ॥१०७॥

मुक्तादाम परीतांगोनिःसंगो मंगलाकरः ।
सुखप्रदः सुखाकारः सुखदुःख विवर्जितः ॥१०८॥

विश्रृंगखलो जगत्कर्ता जितसर्वपितामहः ।
अनपायोक्षयोमुंडी सुरूपोरूपवर्जितः ॥१०९॥

अतींद्रियो महामायो मायावी विगतज्वरः ।
अमृतः शाश्वतः शांतोमृत्युहा मूकनाशकः ॥११०॥

महाप्रेतासनासीनः पिशाचानुचरारतः ।
गौरीविलाससदनो नानागानविशारदः ॥१११॥

विचित्रमाल्यवसनो दिव्यचंदनचर्चितः ।
विष्णु ब्रह्मा दिवंद्यांध्रिः सुरासुर नमस्कृतः ॥११२॥

किरीटलेढिबालेंदुर्मणिकंकण भूषितः ।
रत्नांगदांगोरत्नेशो रत्नरंजितपादुकः ॥११३॥

नवरत्नगणोपेत किरीटोरत्नकंचुकः ।
नानाविधानेकरत्नलसत्कुंडलमंडितः ॥११४॥

दिव्य रत्न गणाकीर्ण कंठाभरणभूषितः ।
नवभालमणिर्नासापुट भ्राजितमौक्तिकः ॥११५॥

रत्नांगुलीय विलसत्कर शाखानखप्रभः ।
रत्नभ्राजद्धेमसूत्रलसत्कटितटः पटुः ॥११६॥

वामांगभागविलसत्पार्वती वीक्षणप्रियः ।
लीलाविलंबीत वपुर्भक्तमानसमंदीरः ॥११७॥

मंदमंदारपुष्पौधलसद्वायु निषेवितः ।
कस्तूरीविलसद्भालो दिव्य वेष विराजितः ॥११८॥

दिव्यदेहप्रभा कूटसंदीपित दिगंतरः ।
देवासुरगुरुस्तव्योदेवासुर नमस्कृतः ॥११९॥

हस्तराजत्पुंडरीकः पुंडरीक निभेक्षणः ।
सर्वाशास्य गुणोमेयः सर्वलोकेष्ट भूषणः ॥१२०॥

सर्वेष्टदाता सर्वेष्ट स्फुरन्मंगलविग्रहः ।
अविद्यालेशरहितो नानाविद्यैकसंश्रयः ॥१२१॥

मूर्ति भवत्कृपा पूरोभक्तेष्ट फलपूरकः ।
संपूर्णकामः सौभाग्य निधिः सौभाग्यदायकः ॥१२२॥

हितैषीहितकृत्सौम्यः परार्थैकप्रयोजनः ।
शरणागत दीनार्त परित्राण परायणः ॥१२३॥

जिष्नुर्नेता वषट्कारोभ्राजिष्नु भोजनोहविः ।
भोक्ताभोजयिताजेता जितारिर्जितमानसः ॥१२४॥

अक्षरः करणंरुद्रः समरः शारदाप्लवः ।
आज्ञापकोऽयो गंभीरः कविर्दुःस्वप्ननाशकः ॥१२५॥

पंचब्रह्म समुत्पत्तिः क्षेत्रज्ञः क्षेत्रपालकः ।
व्योमकेशोभीमवेषो गौरीपतिरनामयः ॥१२६॥

भवाब्धितरणोपायो भगवान्भक्त वत्सलः ।
वरोवरिष्टोनेदिष्टः प्रियः प्रियदवः सुधीः ॥१२७॥

यंतायविष्ठः क्षोदिष्टो यविष्ठो यमशासकः ।
हिरण्यगर्भोहेमांगो हेमरूपो हिरण्यदः ॥१२८॥

ब्रह्मज्योतिरनावेक्ष्यश्चामुंडाजनकोरविः ।
मोक्षार्थी जनसंसेव्यो मोक्षदोमोक्षनायकः ॥१२९॥

महाश्मशान निलयो वेदाश्वोभूरथास्थितः ।
मृगव्याधोधर्मधामाप्रच्छन्नस्फटिकप्रभ ॥१३०॥

सर्वज्ञः परमार्थात्मा ब्रह्मानंदाश्रयो विभुः ।
महेश्वरो महादेवः परब्रह्म सदाशिवः ॥१३१॥

एवमेतानि नामानि मुख्यानि मम षण्मुख ।
शुभदानि विचित्राणिगौर्यै प्रोक्तानिसादरम् ॥१३२॥

एतन्नामजपे योग्या विप्रादेवामुनीश्वराः ।
शुचिभूताः शिवपरानान्ये रागादि मोहिताः ॥१३३॥

विभूति भूषितवपुः शुद्धोरुद्राक्षभूषणः ।
शिवलिंग समीपस्थो निःसंगो निर्जितासनः ॥१३४॥

एकाग्रचित्तो नियतोवशीभूत हितेरतः ।
शिवलिंगर्चको नित्यं शिवैकशरणः सदा ॥१३५॥

मम नामानि दिव्यानि यो जपेद्भक्तिपूर्वकम् ।
एवमुक्त गणोपेतः सदेवैः पूजितो भवेत् ॥१३६॥

संसारपाश संबद्ध जनमोक्षैक साधनम् ।
मन्नाम स्मरण नूनं तदेव सकलार्थदम् ॥१३७॥

मन्नामैवपरंजप्यंमहमेवाक्षयार्थदः ।
अहमेव सदासेव्यो ध्येयोमुक्त्यर्थमादरात् ॥१३८॥

विभूति वज्रकवचैर्मन्नामशरपाणिभिः ।
विजयः सर्वतो भूत्वा न तेषां दृश्यते भयम् ॥१३९॥

ये मुक्तिदायकमहेश पिनाकपाणे शंभोगिरीशहरशंकर चंद्रमौले ।
विश्वेश्वरांधकरिपोरिपुसुदनेतिमामर्चयंत्यनु वदन्ति त एव धन्याः ॥१४०॥

ये देवदेवजगदीश्वर पंचवक्त्र सोमाग्निभानुनयनानघशूलपाणे ।
गौरीमनोरमणमार निषूदनेतिमामर्चयंत्यनु वदन्ति त एव धन्याः ॥१४१॥

ये सर्वभालनयनामल विश्वमूर्तेश्री नीलकंठ वरदोत्तम विश्वबाहो ।
भर्गत्रिलोचनभगाक्षिहराजरेति मामर्चयंत्यनु वदन्ति त एव धन्याः ॥१४२॥

ये विष्णुवल्लभ सदाशिव कालकाल कालाग्निरुद्रकरुणाकरीनबंधो ।
कर्पूरगौर परमेश महेश्वरेति मामर्चयंत्यनु वदन्ति त एव धन्याः ॥१४३॥

ये वामदेवभवभंजन भूतिभूषभूतेशखंडपरशो प्रमथाधिनाथ ।
विश्वाधिपतिदशवंद्यसुरेश्वरेति मामर्चयंत्यनुवदन्ति त एव धन्याः ॥१४४॥

ये भक्तवत्सलजटापटलावलंबिवालेंदुखंडरूचिमंडलमंडितांग ।
रत्नस्फुर भुजगराजविभूषणेति मामर्चयंत्यनु वदन्ति त एव धन्याः ॥१४५॥

ये भीमषण्मुख गुरोमृगशावहस्त शार्दूलचर्मवसनाव्ययसत्यसंध ।
शैलाधिराजनिलयत्रिपुरांतकेति मामर्चयंत्यनु वदन्ति त एव धन्याः ॥१४६॥

ये भीमरुद्रवृषभध्वज वीरभद्रभद्रावतार भगवन्भवभव्यरुप ।
निःसंग निर्मलनिरंजन निर्गुणेति मामर्चयंत्यनु वदन्ति त एव धन्याः ॥१४७॥

ये कालकूट विषभूरि भयार्तदिवसंरक्षकाद्य विषमाक्ष समस्तसाक्षिन् ।
सूक्ष्मातिसूक्ष्मशिवदक्षमखांतकेति मामर्चयंत्यनु वदन्ति त एव धन्याः ॥१४८॥

येसोमसांबशिपिविष्टजगन्निवासकैलासवासमुनिहृत्कमलाधिवासः ।
सोमावतंसशिपिविष्ट जगन्निवास मामर्चयंत्यनु वदन्ति त एव धन्याः ॥१४९॥

ये यज्ञशाश्वत वृषासन धर्मरूपयज्ञादि कर्मफलदायक यज्ञमूर्ते ।
सृष्टिस्थितिप्रलयकारणसात्विकेति मामर्चयंत्यनुवदन्ति त एव धन्याः ॥१५०॥

ये नीललोहित दिगंबर कृत्तिवास श्रीकंठशांतनिरुपाधिक निर्विकार ।
मृत्युंजयाव्ययनिधीशगणेश्वरेति मामर्चयंत्यनु वदन्ति त एव धन्याः ॥१५१॥

मन्नामामृतपायिनः स्वजननी स्तन्यं पुनः सर्वथानाकांक्षन्ति ।
न चाप्नुवन्तिसततमत्पादपद्मार्चकाः ॥१५२॥

मल्लिंगार्चन तत्परा मम हितामल्लोकएवानिशम् ।
सन्तिष्ठन्ति निरस्तदुःखनिकरामद्भक्तवर्यामुदा ॥१५३॥

मल्लिंगसंपूजन सक्त चित्तामद्भक्त पूजार्थमुपात्तचित्ताः ।
मन्नामसकीर्तनमात्र चित्तामत्तावसंतिमन्नामसुधैकचित्ताः ॥१५४॥

सन्तक्कचित्संतनितांतभीशंस्वांत स्थितं सततमर्चयंतः ।
मामेव विश्वेशमनाद्यनंतमवेद्यमेकं निगमांत वेद्यम् ॥१५५॥

॥ श्री सूत उवाच ॥

इत्युदीरितमाकर्ण्यमहादेवेन तद्वाचः ।
संतुष्टः षण्मुखः शंभुतुष्टावगिरिजासुतः ॥१५६॥

॥ श्री स्कंद उवाचः ॥

देवदेवजगन्नाथदेवदेवोत्तम प्रभो ।
वेदवेदांतवेद्येशजगज्जन्मैक कारण ॥१५७॥

निरामय निराधार निर्द्वन्द्व निरूपाधिकः ।
निष्कलंक निराधार विकाररहितानघ ॥१५८॥

महादेव महाधीश वृषांक वृषवाहन ।
वृषभध्वज विश्वेश त्रिपुरांतक शंकर ॥१५९॥

कालकालकृपासिंधोशितिकंठ शिवप्रियः ।
त्रिकाग्नि काल कालात्मन् कालाधारप्रवर्तक ॥१६०॥

मनोन्मनामलानंत व्योमकेश जगत्पते ।
भूतेशभूतसंघात्मन् भूतैक निलयामल ॥१६१॥

विभूतिभूषणश्रीमन् भस्मोधूलितविग्रह ।
कैलासशिखरासक्तकृत्तिवास महेश्वर ॥१६२॥

कपालमालाभरणजरामरणवर्जित ।
योगवृंदैकमंदार वृंदारकगणार्चित ॥१६३॥

योगिहृत्पंकजारूढ निगूढनिजविग्रह ।
गंडमंडलसंभ्राजन्मणि कुंडलमंडित ॥१६४॥

अनंतचंडमार्तंडमंडलाधिकसुप्रभ ।
हिरण्यबाहो विश्वात्मन् संसारार्णवतारक ॥१६५॥

विश्वतोमुख विश्वात्मन् विश्वतश्चरणाजर ।
विश्वतो लोचनानंत व्योमकेश सदाशिव ॥१६६॥

ज्येष्ठश्रेष्ठ समस्तात्मन् व्यापकानंत विग्रह ।
त्रिशूलपाणेखट्वांगीन्निः संग निगमाश्रय ॥१६७॥

निराश्रयाखिलाधार परब्रह्म परात्पर ।
ब्रह्मानंदैकनिलय मयस्कर निरीश्वर ॥१६८॥

सत्त्वप्रधान सत्त्वात्मन् आनंदमयसर्वग ।
महाश्मशान निलयमहाप्रेतासनस्थिर ॥१६९॥

पिनाकपाणेदुष्टारेशिष्ट लोकैकजीवन ।
शार्दूलचर्मवसनभूधरेश शरासन ॥१७०॥

स्वेच्छाकृतावनीयानदग्ध त्रिपुरकानन ।
वासीकृतानंदवन सोम सूर्याग्निलोचन ॥१७१॥

मुनिचित्रासनासीनकालकूट विषादन ।
कंदर्प दर्पदलनवृषाधीशैकवाहन ॥१७२॥

दुष्टारि संघशमनदुर्लंध्य दृढशासन ।
अप्रधृष्य निरीक्ष्याच्छ तेजः पुंज निरंजन ॥१७३॥

सूतीकृता स्वतंत्रेष्ट हितकृतचतुरानन ।
हिमाद्रीशिखर स्वच्छरत्नचारु स्थिरासन ॥१७४॥

महोदर महावीर महासुर सुरेश्वर ।
महाधीराद्भुताकार सर्वलोक प्रभाकर ॥१७५॥

नमस्ते नमस्ते महादेव शंभो नमस्ते नमस्ते प्रपन्नैकबंधो ।
नमस्ते नमस्ते दयासारसिंधो नमस्ते नमस्ते महेश ॥१७६॥

नमस्ते नमस्ते महामृत्युहारिन्नमस्ते नमस्ते महादुःखहारिन् ।
नमस्ते नमस्ते महापापहारिन्नमस्ते नमस्ते नमस्ते महेश ॥१७७॥

नमस्ते नमस्ते जगज्जन्महेतो नमस्ते नमस्तेरषाधीशकेतो ।
नमस्ते नमस्ते महापुण्यसेतो नमस्ते नमस्ते नमस्ते महेश ॥१७८॥

नमस्ते नमस्ते सदाचंद्रमौले नमस्ते नमस्ते सदा शूलपाणे ।
नमस्ते नमस्ते सदानैकजीवे नमस्ते नमस्ते नमस्ते महेश ॥१७९॥

यस्य स्वरुपं न विदुःसुरासुरायस्यस्वरुपं न विदुर्महेश्वराः ।
यस्य स्वरुपं न विदुर्मुनीश्वरास्तस्यैव नित्यं शिवरूपमीडे ॥१८०॥

यस्य स्वरुपं निगमैरगम्यं यस्य स्वरुप नियमैरगम्यं ।
यस्य स्वरुपं परमैरगम्यं तस्यैवनित्यंशिवरूपमीडे ॥१८१॥

संसारदावानलशामकाय मृत्युंजया यामितविक्रमाय ।
सुरासुरौघार्चितपादुकाय शिवा समेताय नमः शिवाय ॥१८२॥

कुन्देन्दुशंख स्फटिको प्रमाय महेश्वराय आश्रित वत्सलाय ।
श्री नीलकंठायमांतकाय शिवा समेताय नमः शिवाय ॥१८३॥

घोराधिकाघौघ निवारकाय स्वर्गापवर्गादि फलप्रदाय ।
निरामयायांधकसूदनाय शिवा समेताय नमः शिवाय ॥१८४॥

भुजंगचक्राधिप भूषणाय नानामणि भ्राजित कुंडलाय ।
कर्पूर गौराय सुरोत्तमाय शिवा समेताय नमः शिवाय ॥१८५॥

त्रिकाग्नि कालाय मनोन्मनाय त्रियंबकायत्रिपुरांतकाय ।
कालाग्निरुद्राय जगन्मयाय शिवा समेताय नमः शिवाय ॥१८६॥

दयासमुद्राय निधीश्वराय धनेश मित्राय सुधामयाय ।
कारुण्यरूपाय मयस्कराय शिवा समेताय नमः शिवाय ॥१८७॥

ब्रह्मेन्द्र विष्णवादिसुरार्चिताय देवाधिदेवाय दिगंबराय ।
अनंतकल्याण गुणार्णवाय शिवा समेताय नमः शिवाय ॥१८८॥

वेदांतवेद्याय महोदयाय कैलासवासाय शिवाधवाय ।
शिवस्वरूपाय सदा शिवाय शिवा समेताय नमः शिवाय ॥१८९॥

॥ सूत उवाच ॥

इतिस्तुत्वामहादेव सर्वव्यापी नमीश्वरम् ।
पुनः पुनः प्रणम्यायस्कंद स्तस्थौकृतांजलिः ॥१९०॥

महेश्वरः प्रसन्नात्मा कुमारंनतकंधरम् ।
प्रीत्याप्रोवाच वचनं सर्वानंद करंततः ॥१९१॥

॥ श्री शिव उवाच ॥

प्रहृष्टोऽस्मि प्रसन्नोऽस्मि स्तोत्रेणानेन षण्मुख ।
वरदोऽहं वरानिष्टान् वृणुदास्ये वरानहम् ॥१९२॥

॥ श्री स्कंद उवाच ॥

सांबशंभो महादेव दयासागर शंकर ।
मच्चित्त भ्रमरो नित्यं तवास्तु पदपङ्कजे ॥१९३॥

सर्वथा शर्व सर्वेष सर्वोत्तम महेश्वर ।
तं नामामृतं दिव्यं जिह्वाग्रे मम तिष्ठतु ॥१९४॥

अनन्यशरणं चित्तं तवैव चरणाम्बुजे ।
निवसत्त्व निशं शंभो ममदेवो दयानिधे ॥१९५॥

शिवास्तु तव पादाब्जे मन्मनो मकरंदपः ।
चतुर्वर्ग फलाकार मकरंद विजृंभिते ॥१९६॥

किंकरेण मयान्येन मयैतद्या चितंवरम् ।
सर्वसौभाग्यदं नूनं इति वेदैर्विनिश्चितम् ॥१९७॥

इति तद्वचनं श्रुत्वा साम्बः संतुष्ट मानसः ।
पश्पर्श तच्छिरः सम्यक् आनंद परिपूरितः ॥१९८॥

कुमार तवभाग्यस्य नान्तो नूनं न संशयः ।
तत्वतो मां विदित्वैव विश्वेशं स्तोतुमिच्छसि ॥१९९॥

त्वया तु याचितं दत्तं मया तुभ्यम् वरोत्तमम् ।
वरान्तरं प्रदास्यामि सर्वलोकोपकारकम् ॥२००॥

त्वयेह यत्कृतं स्तोत्रं मम प्रियकरं परम् ।
सद्यः पठेत् शुचिर्नित्यं स समाप्नोत्वभिप्सितम् ॥२०१॥

अघोरपातकेभ्यश्च संसाराच्च विमुच्यताम् ।
भक्तिमानयस्तु सततं मयि शाम्बे महेश्वरे ॥२०२॥

॥ श्री सूत उवाच ॥

इति दत्त्वा वरानिष्टान् शाम्बः संसारमोचकः ।
तस्थावतीव संतुष्टो ब्रह्मविष्णवादि सेवितः ॥२०३॥
भवन्तोऽपि मुनिश्रेष्ठाः शाम्बध्यान परायणाः ।
शिवनाम जपंकृत्वा तिष्ठन्तु सुखिनः सदा ॥२०४॥
शिव एव सदासेव्यः सर्वदेवोत्तमः प्रभुः ।
शिव एव सदा पूज्यो मुक्तिकामैर्नसंशयः ॥२०५॥
महेशान्नापरो देवः स एव सुरसत्तमः ।
स एव सर्ववेदान्त वेद्यो नात्रास्ति संशयः ॥२०६॥
अनन्यशरणो यस्तु शंकरार्चन तत्परः ।
स एव धन्यः पुण्यात्मा सत्यमेवोच्यते मया ॥२०७॥
जन्मान्तर सहस्रेषु तप्तं यदि तपस्तदा ।
तस्य श्रद्धा महादेवे भक्तिश्च भवति ध्रुवम् ॥२०८॥
मुक्तिदाता महादेवादन्यो नास्त्येव सर्वथा ।
सत्यमेतत् पुनः सत्यं सत्यमेतन्न संशयः ॥२०९॥
सुभगा जननी तस्य तस्यैव कुलमुन्नतम् ।
तस्यैव जन्म सफलं यस्य भक्तिः सदा शिवे ॥२१०॥
ये शंभु सुरसत्तमं सुरगणैराराध्य निशं शिवम् ।
शैलाधिश सुतासमेत ममलं संपूजयन्त्यादरात् ॥२११॥
ते धन्या शिवपादपूजन पराह्यन्यो न धन्यो जनः ।
सत्यं सत्यमेवोच्यते मुनिवरा सत्यं पुनः सर्वथा ॥२१२॥

इति शिवरहस्ये सप्तमांशे स्कंद सदाशिवसंवादे मुख्य शिवसहस्रनाम स्तोत्रं संपूर्णम् ।
श्री रस्तु ॥ कल्याणमस्तु ॥

■

४

अथ श्री वायुपुराणे

श्रीशिवसहस्रनामस्तोत्रम्

॥ श्री दक्ष उवाच ॥

नमस्ते देवदेवेश देवारिबलसूदन ।
देवेन्द्र ह्यमरश्रेष्ठ देवदानवपूजित ॥१॥

सहस्राक्ष विरूपाक्ष त्र्यक्ष यक्षाधिपप्रिय ।
सर्वतः पाणिपादस्त्वं सर्वतोऽक्षिशिरोमुखः ।
सर्वतः श्रुतिमान् लोके सर्वानावृत्य तिष्ठसि ॥२॥

शङ्कुकर्ण महाकर्ण कुम्भकर्णार्णवालय ।
गजेन्द्रकर्ण गोकर्ण पाणिकर्ण नमोऽस्तु ते ॥३॥

शतोदर शतावर्त शतजिह्व शतानन ।
गायन्ति त्वां गायत्रिणो ह्यर्च्चयन्ति तथार्चिनः ॥४॥

देवदानवगोप्ता च ब्रह्मा च त्वं शतक्रतुः ।
मूर्तीशस्त्वं महामूर्ते समुद्राम्बुधराय च ॥५॥

सर्वाः ह्यस्मिन् देवतास्ते गावो गोष्ठे इवासते ।
शरीरन्ते प्रपश्यामि सोममग्निं जलेश्वरम् ॥६॥

आदित्यमथ विष्णुञ्च ब्रह्माणं सबृहस्पतिम् ।
क्रिया कार्य्यं कारणञ्च कर्ता करणमेव च ॥७॥

असच्च सदसच्चैव तथैव प्रभवाव्ययम् ।
नमो भवाय शर्वाय रुद्राय वरदाय च ॥८॥

पशूनां पतये चैव नमस्त्वन्धकघातिने ।
त्रिजटाय त्रिशीर्षाय त्रिशूलवरधारिणे ॥९॥

त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः ।
नमश्चण्डाय मुण्डाय प्रचण्डाय धराय च ॥१०॥

तरङ्गाङ्कितकेशाय मुक्तकेशाय वै नमः ।
नमः षट्कर्मनिष्ठाय त्रिकर्मनिरताय च ॥३७॥

वर्णाश्रमाणां विधिवत् पृथक्कर्मप्रवर्तिने ।
नमो घोषाय घोष्याय नमः कलकलाय च ॥३८॥

श्वेतपिङ्गलनेत्राय कृष्णरक्तक्षणाय च ।
धर्मार्थकाममोक्षाय क्वथाय कमनाय च ॥३९॥

साङ्ख्याय साङ्ख्यमुख्याय योगाधिपतये नमः ।
नमो रथ्यविरथ्याय चतुष्पथरताय च ॥४०॥

कृष्णाजिनोत्तरीयाय व्यालयज्ञोपवीतिने ।
ईशानवज्रसंहाय हरिकेश नमोऽस्तु ते ।
अविवेकैकनाथाय व्यक्ताव्यक्त नमोऽस्तु ते ॥४१॥

काम कामद कामघ्न धृष्टोदृप्तनिषूदन ।
सर्व सर्वद सर्वज्ञ सन्ध्याराग नमोऽस्तु ते ॥४२॥

महाबाल महाबाहो महासत्त्व महाद्युते ।
महामेघवरप्रेक्ष महाकाल नमोऽस्तु ते ॥४३॥

स्थूलजीर्णाङ्गजटिने वल्कलाजिनधारिणे
दीप्तसूर्याग्निजटिने वल्कलाजिनवाससे ।
सहस्रसूर्यप्रतिम तपोनित्य नमोऽस्तु ते ॥४४॥

उन्मादनशतावर्त गङ्गातोयार्द्धमूर्द्धज ।
चन्द्रावर्त युगावर्त मेघावर्त नमोऽस्तु ते ॥४५॥

त्वमन्नमन्नकर्ता च अन्नदश्च त्वमेव हि ।
अन्नस्रष्टा च पक्ता च पक्वभुक्तपचे नमः ॥४६॥

जरायुजोऽण्डजश्चैव स्वेदजोद्भिज्ज एव च ।
त्वमेव देवदेवेशो भूतग्रामश्चतुर्विधः ॥४७॥

चराचरस्य ब्रह्मा त्वं प्रतिहर्ता त्वमेव च ।
त्वमेव ब्रह्मविदुषामपि ब्रह्मविदां वरः ॥४८॥

सत्त्वस्य परमा योनिरब्वायुज्योतिषां निधिः ।
ऋक्सामानि तथोङ्कारमाहुस्त्वां ब्रह्मवादिनः ॥४९॥

हविर्हावी हवो हावी हुवां वाचाहुतिः सदा ।
गायन्ति त्वं सुरश्रेष्ठ सामगा ब्रह्मवादिनः ॥५०॥

यजुर्मयो ऋङ्मयश्च सामाथर्वमयस्तथा ।
पठ्यसे ब्रह्मविद्भिस्त्वं कल्पोपनिषदां गणैः ॥५१॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णावराश्च ये ।
त्वामेव मेघसङ्घाश्च विश्वस्तनितगर्जितम् ॥५२॥

संवत्सरस्त्वमृतवो मासा मासार्द्धमेव च ।
कला काष्ठा निमेषाश्च नक्षत्राणि युगा ग्रहाः ॥५३॥

वृषाणां ककुदं त्वं हि गिरीणां शिखराणि च ।
सिंहो मृगाणां पततां तार्क्ष्योऽनन्तश्च भोगिनाम् ॥५४॥

क्षीरोदो ह्युदधीनाञ्च यन्त्राणां धनुरेव च ।
वज्रम्प्रहरणानाञ्च व्रतानां सत्यमेव च ॥५५॥

इच्छा द्वेशश्च रागश्च मोहः क्षामो दमः शमः ।
व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ ॥५६॥

त्वं गदी त्वं शरी चापि खट्वाङ्गी झर्झरीं तथा ।
छेत्ता भेत्ता प्रहर्ता च त्वं नेताप्यन्तको मतः ॥५७॥

दशलक्षणसंयुक्तो धर्मोऽर्थः काम एव च ।
इन्द्रः समुद्राः सरितः पल्वलानि सरांसि च ॥५८॥

लतावल्लीतृणौषध्यः पशवो मृगपक्षिणः ।
द्रव्यकर्मगुणारम्भः कालपुष्पफलप्रदः ॥५९॥

आदिश्चान्तश्च मध्यश्च गायत्र्योङ्कार एव च ।
हरितो लोहितः कृष्णो नीलः पीतस्तथारुणः ॥६०॥

कद्रुश्च कपिलश्चैव कपोतो मेचकस्तथा ।
सुवर्णरेता विख्यातः सुवर्णश्चाप्यतो मतः ॥६१॥

सुवर्णनामा च तथा सुवर्णप्रिय एव च ।
त्वमिन्द्रोऽथ यमश्चैव वरुणो धनदोऽनलः ॥६२॥

उत्फुल्लश्चित्रभानुश्च स्वर्भानुर्भानुरेव च ।
होत्रं होता च होमस्त्वं हुतश्च प्रहुतं प्रभुः ॥६३॥

सुपर्णश्च तथा ब्रह्म यजुषां शतरुद्रियम् ।
पवित्राणां पवित्रं च मङ्गलानाञ्च मङ्गलम् ॥६४॥

गिरिः स्तोकस्तथा वृक्षो जीवः पुद्गल एव च ।
सत्त्वं त्वञ्च रजस्त्वञ्च तमश्च प्रजनं तथा ॥६५॥

प्राणोऽपानः समानश्च उदानो व्यान एव च ।
उन्मेषश्चैव मेषश्च तथा जृम्भितमेव च ॥६६॥

लोहिताङ्गो गदी दंष्ट्री महावक्त्रो महोदरः ।
शुचिरोमा हरिच्छ्मश्रुरूर्ध्वकेशस्त्रिलोचनः ॥६७॥

गीतवादित्रनृत्याङ्गो गीतवादनकप्रियः ।
मत्स्यो जली जलो जल्यो जवः कालः कली कलः ॥६८॥

विकालश्च सुकालश्च दुष्कालः कलनाशनः ।
मृत्युश्चैव क्षयोऽन्तश्च क्षमापायकरो हरः ॥६९॥

संवर्तकोऽन्तकश्चैव संवर्तकबलाहकौ ।
घटो घटीको घण्टीको चूडालोलबलो बलम् ॥७०॥

ब्रह्मकालोऽग्निवक्त्रश्च दण्डी मुण्डी च दण्डधृक् ।
चतुर्युगश्चतुर्वेदश्चतुर्होत्रश्चतुष्पथः ॥७१॥

चतुराश्रमवेत्ता च चातुर्वर्ण्यकरश्च ह ।
क्षराक्षरप्रियो धूर्तोऽगण्योऽगण्यगणाधिपः ॥७२॥

रुद्राक्षमाल्याम्बरधरो गिरिको गिरिकप्रियः ।
शिल्पीशः शिल्पिनां श्रेष्ठः सर्वशिल्पप्रवर्तकः ॥७३॥

भगनेत्रान्तकश्चन्द्रः पूष्णो दन्तविनाशनः ।
गूढावर्तश्च गूढश्च गूढप्रतिनिषेविता ॥७४॥

तरणस्तारकश्चैव सर्वभूतसुतारणः ।
धाता विधाता सत्वानां निधाता धारणो धरः ॥७५॥

तपो ब्रह्म च सत्यश्च ब्रह्मचर्यमथार्जवम् ।
भूतात्मा भूतकृद्भूतो भूतभव्यभवोद्भवः ॥७६॥

भूर्भुवः स्वरितश्चैव तथोत्पत्तिर्महेश्वरः ।
ईशानो वीक्षणः शान्तो दुर्दान्तो दन्तनाशनः ॥७७॥

ब्रह्मावर्त सुरावर्त कामावर्त नमोऽस्तु ते ।
कामबिम्बनिहर्ता च कर्णिकाररजः प्रियः ॥७८॥

मुखचन्द्रो भीममुखः सुमुखो दुर्मुखो मुखः ।
चतुर्मुखो बहुमुखो रणे ह्यभिमुखः सदा ॥७९॥

हिरण्यगर्भः शकुनिर्महोदधिः परो विराट् ।
अधर्महा महादण्डो दण्डधारी रणप्रियः ॥८०॥

गोतमो गोप्रतारश्च गोवृषेश्वरवाहनः ।
धर्मकृद्धर्मस्रष्टा च धर्मो धर्मविदुत्तमः ॥८१॥

त्रैलोक्यगोप्ता गोविन्दो मानदो मान एव च ।
तिष्ठन् स्थिरश्च स्थाणुश्च निष्कम्पः कम्प एव च ॥८२॥

दुर्वारणो दुर्विषहो दुःसहो दुरतिक्रमः ।
दुर्द्धरो दुष्प्रकम्पश्च दुर्विदो दुर्जयो जयः ॥८३॥

शशः शशाङ्कः शमनः शीतोष्णं दुर्जराऽथ तृट् ।
आधयो व्याधयश्चैव व्याधिहा व्याधिगश्च ह ॥८४॥

सह्यो यज्ञो मृगा व्याधा व्याधीनामाकरोऽकरः ।
शिखण्डी पुण्डरीकाक्षः पुण्डरीकावलोकनः ॥८५॥

दण्डधरः सदण्डश्च दण्डमुण्डविभूषितः ।
विषपोऽमृतपश्चैव सुरापः क्षीरसोमपः ॥८६॥

मधुपश्चाज्यपश्चैव सर्वपश्च महाबलः ।
वृषाश्ववाह्यो वृषभस्तथा वृषभलोचनः ॥८७॥

वृषभश्चैव विख्यातो लोकानां लोकसत्कृतः ।
चन्द्रादित्यौ चक्षुषी ते हृदयञ्च पितामहः ।
अग्निरापस्तथा देवी धर्मकर्मप्रसाधितः ॥८८॥

न ब्रह्मा न च गोविन्दः पुराणऋषयो न च ।
माहात्म्यं वेदितुं शक्ता याथातथ्येन ते शिव ॥८९॥

या मूर्तयः सुसूक्ष्मास्ते न मह्यं यान्ति दर्शनम् ।
ताभिर्मां सततं रक्ष पिता पुत्रमिवौरसम् ॥९०॥

रक्ष मां रक्षणीयोऽहं तवानघ नमोऽस्तु ते ।
भक्तानुकम्पी भगवान् भक्तश्चाहं सदा त्वयि ॥९१॥

यः सहस्राण्यनेकानि पुंसामाहृत्य दुर्दृशः ।
तिष्ठत्येकः समुद्रान्ते स मे गोप्तास्तु नित्यशः ॥९२॥

यं विनिद्रा जितश्वासाः सत्त्वस्थाः समदर्शिनः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥९३॥

सम्भक्ष्य सर्वभूतानि युगान्ते समुपस्थिते ।
यः शेते जलमध्यस्थस्तं प्रपद्येऽप्सुशायिनम् ॥९४॥

प्रविश्य वदने राहोर्यः सोमं ग्रसते निशि ।
ग्रसत्यर्कञ्च स्वर्भानुर्भूत्वा सोमाग्निरेव च ॥९५॥

येऽङ्गुष्ठमात्राः पुरुषा देहस्थाः सर्वदेहिनाम् ।
रक्षन्तु ते हि मां नित्यं नित्यमाप्याययन्तु माम् ॥९६॥

ये चाप्युत्पतिता गर्भादधोभागगताश्च ये ।
तेषां स्वाहाः स्वधाश्चैव आप्नुवन्तु स्वदन्तु च ॥९७॥

ये न रोदन्ति देहस्थाः प्राणिनो रोदयन्ति च ।
हर्षयन्ति च हृष्यन्ति नमस्तेभ्योऽस्तु नित्यशः ॥९८॥

ये समुद्रे नदीदुर्गे पर्वतेषु गुहासु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ॥९९॥

चतुष्पथेषु रथ्यासु चत्वरेषु सभासु च ।
चन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु ॥१००॥

रसातलगता ये च ये च तस्मात्परङ्गताः ।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्यश्च नित्यशः ।
सूक्ष्माः स्थूलाः कृशा ह्रस्वा नमस्तेभ्योस्तु नित्यशः ॥१०१॥

सर्वस्त्वं सर्वगो देव सर्वभूतपतिर्भवान् ।
सर्वभूतान्तरात्मा च तेन त्वं न निमन्त्रितः ॥१०२॥

त्वमेव चेज्यसे यस्माद्यज्ञैर्विविधदक्षिणैः ।
त्वमेव कर्ता सर्वस्य तेन त्वं न निमन्त्रितः ॥१०३॥

अथ वा मायया देव मोहितः सूक्ष्मया त्वया ।
एतस्मात् कारणद्वापि तेन त्वं न निमन्त्रितः ॥१०४॥

प्रसीद मम देवेश त्वमेव शरणं मम ।
त्वं गतिस्त्वं प्रतिष्ठा च न चान्यास्ति मे गतिः ॥१०५॥

स्तुत्वैवं स महादेवं विरराम प्रजापतिः ।
भगवानपि सुप्रीतः पुनर्दक्षमभाषत ॥१०६॥

परितुष्टोऽस्मि ते दक्ष स्तवेनानेन सुव्रत ।
बहुनात्र किमुक्तेन मत्समीपं गमिष्यसि ॥१०७॥

अथैनमब्रवीद्वाक्यं त्रैलोक्याधिपतिर्भवः ।
कृत्वाश्वासकरं वाक्यं वाक्यज्ञो वाक्यमाहृतम् ॥१०८॥

दक्ष दक्ष न कर्तव्यो मन्युर्विघ्नमिमं प्रति ।
अहं यज्ञहा न त्वन्यो दृश्यते तत्पुरा त्वया ॥१०९॥

भूयश्च तं वरमिमं मत्तो गृह्णीष्व सुव्रत ।
प्रसन्नवदनो भूत्वा त्वमेकाग्रमनाः श्रृणु ॥११०॥

अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
प्रजापते मत्प्रसादात् फलभागी भविष्यसि ॥१११॥

वेदान्षडङ्गानुद्धृत्य साङ्ख्यान्योगांश्च कृत्स्नशः।
तपश्च विपुलं तप्त्वा दुश्चरं देवदानवैः ॥११२॥

अर्थैर्दशार्द्धसंयुक्तैर्गूढमप्राज्ञनिर्म्मितम् ।
वर्णाश्रमकृतैर्धर्मैर्विपरीतं क्वचित्समम् ॥११३॥

श्रुत्यर्थैरध्यवसितं पशुपाशविमोक्षणम् ।
सर्वेषामाश्रमाणान्तु मया पाशुपतं व्रतम् ।
उत्पादितं शुभं दक्ष सर्वपापविमोक्षणम् ॥११४॥

अस्य चीर्णस्य यत्सम्यक् फलं भवति पुष्कलम् ।
तदस्तु ते महाभाग मानसस्त्यज्यतां ज्वरः ॥११५॥

एवमुक्त्वा महादेवः सपत्नीकः सहानुगः ।
अदर्शनमनुप्राप्तो दक्षस्यामितविक्रमः ॥११६॥

अवाप्य च तदा भागं यथोक्तं ब्रह्मणा भवः ।
ज्वरश्च सर्वधर्मज्ञो बहुधा व्यभजत्तदा ।
शान्त्यर्थं सर्वभूतानां श्रृणुध्वं तत्र वै द्विजाः ॥११७॥

शीर्षाभितापो नागानां पर्वतानां शिलारुजः ।
अपान्तु नालिकां विद्यान्निर्मोकम्भुजगेष्वपि ॥११८॥

खौरकः सौरभेयाणामूषरः पृथिवीतले ।
इभानामपि धर्मज्ञ दृष्टिप्रत्यवरोधनम् ॥११९॥

रन्ध्रोद्भूतं तथाश्वानां शिखोद्भेदश्च बर्हिणाम् ।
नेत्ररोगः कोकिलानां ज्वरः प्रोक्तो महात्मभिः ॥१२०॥

अजानां पित्तभेदश्च सर्वेषामिति नः श्रुतम् ।
शुकानामपि सर्वेषां हिमिका प्रोच्यते ज्वरः ।
शार्दूलेष्वपि वै विप्राः श्रमो ज्वर इहोच्यते ॥१२१॥

मानुषेषु तु सर्वज्ञ ज्वरो नामैष कीर्तितः ।
मरणे जन्मनि तथा मध्ये च विशते सदा ॥१२२॥

एतन्माहेश्वरं तेजो ज्वरो नाम सुदारुणः ।
नमस्यश्चैव मान्यश्च सर्वप्राणिभिरीश्वरः ॥१२३॥

इमां ज्वरोत्पत्तिमदीनमानसः पठेत्सदा यः सुसमाहितो नरः ।
विमुक्तरोगःसनरोमुदायुतोलभेतकामान्सयथामनीषितान्॥१२४॥

दक्षप्रोक्तं स्तवञ्चापि कीर्तयेद्यः श्रृणोति वा ।
नाशुभं प्राप्नुयात् किञ्चिद्दीर्घञ्चायुरवाप्नुयात् ॥१२५॥

यथा सर्वेषु देवेषु वरिष्ठो योगवान् हरः ।
तथा स्तवो वरिष्ठोऽयं स्तवानां ब्रह्मनिर्मितः ॥१२६॥

यशोराज्यसुखैश्वर्यवित्तायुर्धनकाङ्क्षिभिः ।
स्तोतव्यो भक्तिमास्थाय विद्याकामैश्च यत्नतः ॥१२७॥

व्याधितो दुःखितो दीनश्चौरत्रस्तो भयार्दितः ।
राजकार्यनियुक्तो वा मुच्यते महतो भयात् ॥१२८॥

अनेन चैव देहेन गणानां स गणाधिपः ।
इह लोके सुखं प्राप्य गण एवोपपद्यते ॥१२९॥

न च यक्षाः पिशाचा वा न नागा न विनायकाः ।
कुर्युर्विघ्नं गृहे तस्य यत्र संस्तूयते भवः ॥१३०॥

श्रृणुयाद्वा इदं नारी सुभक्त्या ब्रह्मचारिणी ।
पितृभिर्भर्तृपक्षाभ्यां पूज्या भवति देववत् ॥१३१॥

श्रृणुयाद्वा इदं सर्वं कीर्तयेद्वाप्यभीक्ष्णशः ।
तस्य सर्वाणि कार्याणि सिद्धिं गच्छन्त्यविघ्नतः ॥१३२॥

मनसा चिन्तितं यच्च यच्च वाचाप्युदाहृतम् ।
सर्वं सम्पद्यते तस्य स्तवनस्यानुकीर्तनात् ॥१३३॥

देवस्य सगुहस्याथ देव्या नन्दीश्वरस्य तु ।
बलिं विभवतः कृत्वा दमेन नियमेन च ॥१३४॥

ततः स युक्तो गृह्णीयान्नामान्याशु यथाक्रमम् ।
ईप्सितान् लभतेऽत्यर्थं कामान् भोगांश्च मानवः ।
मृतश्च स्वर्गमाप्नोति स्त्रीसहस्रपरिवृतः ॥१३५॥

सर्वकर्मसु युक्तो वा युक्तो वा सर्वपातकैः ।
पठन् दक्षकृतं स्तोत्रं सर्वपापैः प्रमुच्यते ।
मृतश्च गणसालोक्यं पूज्यमानः सुरासुरैः ॥१३६॥

वृषेव विधियुक्तेन विमानेन विराजते ।
आभूतसंप्लवस्थायी रुद्रस्यानुचरो भवेत् ॥१३७॥

इत्याह भगवान् व्यासः पराशरसुतः प्रभुः ।
नैतद्वेदयते कश्चिन्नेदं श्राव्यन्तु कस्यचित् ॥१३८॥

श्रुत्वैतत्परमं गुह्यं येऽपि स्युः पापकारिणः ।
वैश्याः स्त्रियश्च शूद्राश्च रुद्रलोकमवाप्नुयुः ॥१३९॥

श्रावयेद्यस्तु विप्रेभ्यः सदा पर्वसु पर्वसु ।
रुद्रलोकमवाप्नोति द्विजो वै नात्र संशयः ॥१४०॥

■

५

अथ श्री वामनपुराणे

श्रीशिवसहस्रनामस्तोत्रम्

॥ श्री वेन उवाच ॥

प्रपद्ये देवमीशानं त्वामजं चन्द्रभूषणम् ।
महादेवं महात्मानं विश्वस्य जगतः पतिम् ॥१॥

नमस्ते देवदेवेश सर्वशत्रुनिषूदन ।
देवेश बलिविष्टम्भिन्देवैर्दैत्यैश्च पूजित ॥२॥

विरूपाक्ष सहस्राक्ष त्र्यक्ष यक्षेश्वरप्रिय ।
सर्वतः पाणिपाद त्वं सर्वतोऽक्षिशिरोमुख ॥३॥

सर्वतः श्रुतिमल्लोके सर्वमावृत्त्य तिष्ठसि ।
शङ्कुकर्ण महाकर्ण कुम्भकर्णार्णवालय ॥४॥

गजेन्द्रकर्ण गोकर्ण पाणिकर्ण नमोऽस्तु ते ।
शतजिह्व शतावर्त शतोदर शतानन ॥५॥

गायन्ति त्वां गायत्रिणो ह्यर्चयन्त्यर्क्कमर्किणः ।
ब्रह्माणं त्वा शतक्रतोरूर्ध्वं त्वामिह मेनिरे ॥६॥

मूर्त्तौ हि ते महामूर्त्ते समुद्रास्तु धरा तथा ।
देवताः सर्व एवात्र गोष्ठे गाव इवासते ॥७॥

शरीरे तव पश्यामि सोममग्निं जलेश्वरम् ।
नारायणं तथा सूर्यं ब्रह्माणं च बृहस्पतिम् ॥८॥

भगवन्कारणं कार्यं क्रिया कारणमेव तत् ।
प्रभवः प्रलयश्चैव सदसच्चापि दैवतम् ॥९॥

नमो भवाय शर्वाय वरदायोग्ररूपिणे ।
अन्धकासुरहन्त्रे च पशूनां पतये नमः ॥१०॥

त्रिजटाय त्रिशीर्षाय त्रिशूलासक्तपाणये ।
त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्न नमोऽस्तु ते ॥११॥

नमो दण्डाय चण्डाय अण्डायोत्पत्तिहेतवे ।
डिण्डिमासक्तहस्ताय दण्डिमुण्डाय ते नमः ॥१२॥

नमोर्ध्वकेशदंष्ट्राय शुक्लायाविकृताय च ।
धूम्रलोहितकृष्णाय नीलग्रीवाय ते नमः ॥१३॥

नमोऽस्त्वप्रतिरूपाय विरूपाय शिवाय च ।
सूर्यमालाय सूर्याय स्वरूपध्वजमालिने ॥१४॥

नमो नानाभिरामाय नमः पटुतराय च ।
नमो गणेन्द्रनाथाय वृषस्कन्धाय धन्विने ॥१५॥

संक्रन्दनाय चण्डाय पर्णधारपुटाय च ।
नमो हिरण्यवर्णाय नमः कनकवर्चसे ॥१६॥

नमः स्तुताय स्तुत्याय स्तुतिस्थाय नमोऽस्तु ते ।
सर्वाय सर्वभक्षाय सर्वभूतशरीरिणे ॥१७॥

नमो होत्रे च हन्त्रे च सितोदग्रपताकिने ।
नमो नमाय मन्त्राय नमः कटकटाय च ॥१८॥

नमोऽस्तु कृशनाशाय शयितायोत्थिताय च ।
स्थिताय धामसाराय मुण्डाय कुटिलाय च ॥१९॥

नमो नर्त्तनशीलाय लयवादित्रशालिने ।
नाट्योपहारलुब्धाय सुखवादित्रशालिने ॥२०॥

नमो ज्येष्ठाय श्रेष्ठाय बलातिबलघातिने ।
कालनाशाय कालाय संसारक्षयरूपिणे ॥२१॥

हिमवद्दुहितुर्भर्त्रे भैरवाय नमोऽस्तु ते ।
उग्राय च नमो नित्यं नमोऽस्तु दशबाहवे ॥२२॥

चितिभस्मप्रियायैव कपालासक्तपाणये ।
विभीषणाय भीष्माय हिमव्रतधराय च ॥२३॥

नमो विकृतवक्त्राय वक्त्राप्रान्तोग्रदृष्टये ।
पक्वाममांसलुब्धाय तुम्बीवीणाप्रियाय च ॥२४॥

नमो वृषाङ्कवृष्टाय गोमिने ते नमो नमः ।
कटङ्कटाय भीमाय नमः पचपचाय च ॥२५॥

नमः सर्ववरिष्ठाय वराय वरदायिने ।
नमो विरक्तवक्त्राय भावनायाक्षमालिने ॥२६॥

विभेदभेदभिन्नाय छायायै तपनाय च ।
अघोरघोररूपाय घोरघोरतराय च ॥२७॥

नमः शिवाय शान्ताय नमः शान्ततमाय च ।
बहुनेत्रकपालाय एकमूर्त्ते नमोऽस्तु ते ॥२८॥

नमः क्षुद्राय लुब्धाय यज्ञभागप्रियाय च ।
पञ्चालाय सिताङ्गाय नमो यमनियामिने ॥२९॥

नमश्चित्रोरुघण्टाय घण्टाघण्टनिघण्टिने ।
सहस्रशतघण्टाय घण्टामालाविभूषिणे ॥३०॥

प्राणिसंघट्टघण्टाय नमः किलकिलप्रिय ।
हुंहुंकाराय पाराय हुंकाराय प्रियाय च ॥३१॥

नमः समसमे नित्यं गृहवृक्षनिकेतिने ।
गर्भमांसश्रृगालाय तारकाय तराय च ॥३२॥

नमो यज्ञाय यजिने हुताय प्रहुताय च ।
यज्ञवाहाय हव्याय तप्याय तपनाय च ॥३३॥

नमस्तुण्डाय तुण्ड्याय तुण्डानां पतये नमः ।
अन्नदायान्नपतये नमो नानान्नभोजिने ॥३४॥

नमः सहस्रशीर्षाय सहस्रचरणाय च ।
सहस्रोद्यतशूलाय सहस्राभरणाय च ॥३५॥

बालानुचरगोत्रे ब बाललीलाविलासिने ।
नमो बालाय वृद्धाय क्षुब्धाय क्षोभणाय च ॥३६॥

गङ्गालुलितकेशाय मुञ्जकेशाय वै नमः ।
नमः षट्कर्मतुष्टाय त्रिकर्मनिरताय च ॥३७॥

नग्नप्राणाय चण्डाय कृशायास्फोटनाय च ।
धर्मार्थकाममोक्षाणां कथ्याय कथनाय च ॥३८॥

साङ्ख्यायसाङ्ख्यमुख्यायसाङ्ख्ययोगमुखायच।
नमो विरथरथ्याय चतुष्पथरथाय च ॥३९॥

कृष्णाजिनोत्तरीयाय हरिकेश नमोऽस्तु ते ।
त्र्यम्बिकाम्बिकनाथाय व्यक्ताव्यक्ताय वेधसे ॥४०॥

काम कामद कामघ्न तृप्तातृप्त विचारिणे ।
नमः सर्वदयापघ्न कल्पसंध्याविचारिणे ॥४१॥

महासत्त्वमहाबाहो महाबल नमोऽस्तु ते ।
महामेघधरप्रख्य महाकाल महाद्युते ॥४२॥

मेघावर्त्त युगावर्त चन्द्रार्कपतये नमः ।
त्वमन्नमन्नभोक्ता च पक्वभुक्पावनोऽनलः ॥४३॥

जरायुजाश्चाण्डजाश्च स्वेदोद्भिज्जाश्च ते नमः ।
त्वमेव देवदेवेश भूतग्रामश्चतुर्विधः ॥४४॥

स्रष्टा चराचरस्यास्य पाता हन्ता तथैव च ।
त्वामाहुर्ब्रह्मविद्वांसः परं ब्रह्मविदां गतिः ॥४५॥

मनसः परमं ज्योतिज्योतिस्त्वं ज्योतिषामपि ।
हंसो वृक्षो मधुकरः प्राहुस्त्वां ब्रह्मवादिनः ॥४६॥

यज्ञेष्टकाः श्रेष्ठकश्च त्वामाहुर्मुनयस्तथा ।
पठ्यसे स्तुतिभिर्नित्यं वेदोपनिषदां गणैः ॥४७॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णावराश्च ये ।
त्वमेव मेघसंघाश्च विद्युतोऽशनिगर्जितम् ॥४८॥

संवत्सरस्त्वमृतवो मासो मासार्धमेव च ।
युगानि मेषाः काष्ठाश्च नक्षत्राणि ग्रहाबलाः ॥४९॥

वृक्षाणां ककुभोऽसि त्वं गिरीणां हिमवान्गिरिः ।
व्याघ्रो मृगाणां पततां तार्क्ष्योऽनन्तश्च भोगिनाम् ॥५०॥

क्षीरोदोऽस्युदधीनां च यन्त्राणां धनुरेव च ।
वज्रं प्रहरणानां च व्रतानां सत्यमेव च ॥५१॥

त्वमेव द्वेष इच्छा च रागो मोक्षः क्षमाक्षमे ।
व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ ॥५२॥

त्वं शरी त्वं गदी चापि खट्वाङ्गी च शरासनी ।
छेत्ता भेत्ता प्रहर्ताऽसि मन्ता नेता सनातनः ॥५३॥

दशलक्षणसंयुक्तो धर्मोऽर्थः काम एव च ।
समुद्राः सरितो गङ्गा पर्वताश्च सरांसि च ॥५४॥

लतावल्लयस्तृणौषध्यः पशवो मृगपक्षिणः ।
पृथुकर्मगुणारम्भः कालः पुष्पफलप्रदः ॥५५॥

आदिश्चान्तश्च वेदानां गायत्री प्रणवस्तथा ।
लोहितो हरितो नीलः कृष्णः पीतः सितस्तथा ॥५६॥

कद्रुश्च कपिलश्चैव कपोतो मेचकस्तथा ।
सवर्णश्चाप्यवर्णश्च कर्त्ता हर्त्ता त्वमेव हि ॥५७॥

त्वमिन्द्रश्च यमश्चैव वरुणो धनदोऽनिलः ।
उपप्लवस्तत्र भानुः स्वर्भानुर्भानुरेव च ॥५८॥

शिष्या हौत्रं त्रिसौपर्णं यजुषां शतरुद्रियम् ।
पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम् ॥५९॥

तिन्दुको गिरिजो वृक्षो मुद्गं चाखिलजीविनाम् ।
प्राणाः सत्त्वं रजश्चैव तमश्च प्रतिपत्पति ॥६०॥

प्राणोऽपानः समानश्च उदानो व्यान एव च ।
उन्मेषश्च निमेषश्च क्षुतं जृम्भितमेव च ॥६१॥

लोहितान्तर्गतो दृष्टिर्महावक्रो महोदरः ।
शुचिरोमा हरिश्मश्रुरूर्ध्वकेशश्चलाचलः ॥६२॥

गीतवादित्रनृत्यज्ञो गीतवादित्रकप्रियः ।
मत्स्यो जालो जलौकाश्च कालकेलिः कलाकलिः ॥६३॥

अकालश्च विकालश्च दुष्कालः काल एव च ।
मृत्युश्च मृत्युकर्त्ता च यज्ञो यज्ञभयंकरः ॥६४॥

संवर्त्तकोऽन्तकश्चैव संवर्त्तकबलाहकः ।
घण्टो घण्टी महाघण्टी चरी माली च मातलिः ॥६५॥

ब्रह्मकालयगमाग्नीनां दण्डी मुण्डी त्रिमुण्डधृक् ।
चतुर्युगश्चतुर्वेदश्चातुर्होत्रप्रवर्त्तकः ॥६६॥

चातुराश्रम्यनेता च चातुर्वर्ण्यकरस्तथा ।
नित्यलक्षप्रियो मूर्तो गणाध्यक्षो गणाधिपः ॥६७॥

रक्तमाल्याम्बरधरो गिरिको गैरिकप्रियः ।
शिल्पी च शिल्पिनां श्रेष्ठः सर्वशिल्पप्रवर्तकः ॥६८॥

भगनेत्राङ्कुशः शंभुः पूष्णो दन्तविनाशनः ।
स्वाहा स्वधा वषट्कारो नमस्कारो नमो नमः ॥६९॥

गूढव्रतो गुह्यतपास्तारकस्तारकामयः ।
धाता विधाता संधाता पृथिव्या धरणे परः ॥७०॥

ब्रह्मा तपश्च सत्यं च व्रतचर्यमथार्जवम् ।
भूतात्मा भूतकृद्भूतिर्भूतभव्यभवोद्भवः ॥७१॥

भूर्भुवः स्वर्ऋतं चैव ध्रुवो दांतो महेश्वरः ।
दीक्षितोऽदीक्षितः कान्तो दुर्दान्तो दान्तसंभवः ॥७२॥

चन्द्रावर्तो युगावर्त्तः संवर्त्तः संप्रवर्त्तकः ।
बिन्दुः कामो ह्यणुः स्थूलः कर्णिकारस्रजप्रियः ॥७३॥

नन्दिमुखो भीममुखः सुमुखो दुर्मुखस्तथा ।
हिरण्यगर्भः शकुनिर्महोरगपतिर्विराट् ॥७४॥

अधर्महा महादेवो दण्डधारो गणोत्कटः ।
गोनर्दो गोप्रतारश्च गोवृषेश्वरवाहनः ॥७५॥

त्रैलोक्यगोप्ता गोविन्दो गोमार्गो मार्ग एव च ।
स्थिरः श्रेष्ठश्च स्थाणुश्च विकोपः कोप एव च ॥७६॥

दुर्वारणो दुर्विषहो दुःसहो दुरतिक्रमः ।
दुर्द्धर्षो दुष्प्रकाशश्च दुर्दर्शो दुर्जयो जयः ॥७७॥

शशाङ्कानलशीतोष्णक्षुत्तृषाश्च जरामयाः ।
आधयो व्याधयश्चैव आधिहा व्याधिनाशनः ॥७८॥

समूहश्चासमूहश्च हन्ता देवः सनातनः ।
शिखण्डी पुण्डरीकाक्षः पुण्डरीकवनालयः ॥७९॥

त्र्यम्बको दण्डधारश्च उग्रदंष्ट्रः कुलान्तकः ।
विषाग्र्यैर्यः सुरश्रेष्ठः सोमपास्त्वं मरुत्पते ॥८०॥

अमृताशी जगन्नाथो वेददेवगणेश्वरः ।
विषाग्निपाः सोमपाश्चक्षीरपा आज्यपास्तथा ॥८१॥

मधुश्च्युतानां मधुपा ब्रह्मवांस्त्वं घृतच्युतः ।
सर्वलोकस्य भोक्ता त्वं सर्वलोकपितामहः ॥८२॥

हिरण्यरेताः पुरुषस्त्वमेकस्त्वं स्त्रीपुमांस्त्वं हि नपुंसकं च ।
बालो युवा स्थविरो जीर्णदंष्ट्रस्त्वन्ते गिरिर्विश्वकृद्विश्वकर्त्ता ॥८३॥

त्वं वै धाता विश्वकृतो वरेण्यस्त्वां पूजयन्ति प्रणताः सदैव ।
चन्द्रादित्यौ चक्षुषी ते भवानी त्वमेव चाग्निः प्रपितामहश्च ।
सरस्वती वाग्बलमूलभूता अहोरात्रे निमिषोन्मेषकर्त्ता ॥८४॥

न ब्रह्मा न च गोविन्दः पौराणा ऋषयो न ते ।
माहात्म्यं वेदितुं शक्ता याथातथ्येन शंकर ॥८५॥

पुंसां शतसहस्राणि यत्समावृत्य तिष्ठति ।
महतस्तमसः पारे गोप्ता मन्ता भवान्सदा ॥८६॥

यं विनिद्रा जित श्वासाः सत्त्वस्थाः संजितेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥८७॥

या मूर्त्तयश्च सूक्ष्मास्ते न शक्या या निदर्शितुम् ।
ताभिर्मां सततं रक्ष पिता पुत्रमिवौरसम् ॥८८॥

रक्ष मां रक्षणीयोऽयं तवानघ नमोऽस्तु ते ।
भक्तानुकम्पी भगवान्भक्तश्चाहं सदा त्वयि ॥८९॥

जटिने दण्डिने नित्यं लम्बोदर तथा क्रतो ।
दीर्घजिह्व महादंष्ट्र तस्मै रुद्रात्मने नमः ॥९०॥

यस्य केशेषु जीमूता नद्यः सर्वाङ्गसन्धिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥९१॥

संभक्ष्य सर्वभूतानि युगान्ते पर्युपस्थिते ।
यः शेते जलमध्यस्थस्तं प्रपद्येऽम्बुशायिनम् ॥९२॥

प्रविश्य वदनं राहोर्यः सोमं पिबते निशि ।
ग्रसन्नर्कं च स्वर्भानू रक्षितस्ते च तेजसा ॥९३॥

ये चानुपतिता गर्भा रुद्रतोकस्य रक्षिणः ।
नमस्तेऽस्तु स्वधा स्वाहा प्राप्नुवन्ति मुदं तु ते ॥९४॥

येऽङ्गुष्ठमात्राः पुरुषा देहस्थावरदेहिनाम् ।
रक्षन्तु देहिनां नित्यं ते मामाप्याययन्तु वै ॥९५॥

ये नदीषु समुद्रेषु पर्वतेषु गुहासु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ॥९६॥

चतुष्पथेषु रथ्यासु चत्वरेषु सभासु च ।
हस्त्यश्वरथशालासु जीर्णोद्यानालयेषु च ॥९७॥

ये च पञ्चसु भूतेषु दिशासु विदिशासु च ।
चन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु ॥९८॥

रसातलगता ये च ये च तस्मात्परं गताः ।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्यश्च नित्यशः ॥९९॥

येषां न विद्यते संख्या प्रमाणं रूपमेव च ।
असंख्या ये गणा रुद्रा नमस्तेभ्योऽस्तु नित्यशः ॥१००॥

प्रसीद मम भद्रं ते तव भावगतस्य च ।
त्वयि मे हृदयं देव त्वयि बुद्धिर्मतिस्त्वयि ॥१०१॥
स्तुत्वैवं स महादेवं विरराम द्विजोत्तमः ॥१०२॥

इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये सप्तचत्वारिंशोऽध्यायः

■

६

अथ देवीभागवत पुराणान्तर्गतं

श्रीशिवसहस्रनामस्तोत्रम्

॥ श्री भगीरथ उवाच ॥

ॐ नमस्ते पार्वतीनाथ देवदेव परात्पर ।
अच्युतानघ पञ्चास्य भीमास्य रुचिरानन ॥१॥

व्याघ्राजिनधरानन्त पारावारविवर्जित ।
पञ्चानन महासत्त्व महाज्ञानमय प्रभो ॥२॥

अजितामित दुर्धर्ष विश्वेश परमेश्वर ।
विश्वात्मन्विश्वभूतेश विश्वाश्रय जगत्पते ॥३॥

विश्वोपकारिन्विश्वैकवाम विश्वाश्रयाश्रय ।
विश्वाधार सदानन्द विश्वानन्द नमोऽस्तु ते ॥४॥

शर्व सर्वविदज्ञानविवर्जित सुरोत्तम ।
सुरवन्द्य सुरस्तुत्य सुरराज सुरोत्तम ॥५॥

सुरपूज्य सुरध्येय सुरेश्वर सुरान्तक ।
सुरारिमर्दक सुरश्रेष्ठ तेऽस्तु नमो नमः ॥६॥

त्वं शुद्धः शुद्धवोधश्च शुद्धात्मा जगतां पतिः ।
शम्भुः स्वयम्भूरत्युग्र उग्रकर्मोग्रलोचनः ॥७॥

उग्रप्रभावः क्षांत्युग्रमर्दकोत्युग्ररूपवान् ।
उग्रकण्ठः शिवः शान्तः सर्वशान्तिविधायकः ॥८॥

सर्वार्थदः शिवाधारः शिवावनिरमित्रजित् ।
शिवदः शिवकर्ता चाशिवहन्ता शिवेश्वरः ॥९॥

शिशुशैशवयुक्तश्च पिङ्गकेशो जटाधरः ।
गङ्गाधरः कपर्दी च जटाजूटविराजितः ॥१०॥

जटिलो जटिलाराध्यः सर्वदोन्मत्तमानसः ।
उन्मत्तकेश उन्मत्त उन्मत्तानामधीश्वरः ॥११॥

उन्मत्तलोचनो भीमस्त्रिनेत्रो भोमलोचनः ।
बहुनेत्रो द्विनेत्रो वै रक्तनेत्रः सुनेत्रकः ॥१२॥

दीर्घनेत्रश्च पिङ्गाक्षः सुप्रभाक्ष्यः सुलोचनः ।
सोमनेत्रोऽग्निनेत्राख्यः सूर्यनेत्रः सुवीर्यवान् ॥१३॥

पद्माक्षः कमलाक्षश्च नीलोत्पलदलेक्षणः ।
सुलक्षणः शूलपाणिः कपाली कपिलेक्षणः ॥१४॥

व्याघूर्णनयनो धूर्तो व्याघ्रचर्माम्बरावृतः ।
श्रीकण्ठो नीलकण्ठाख्यः शितिकण्ठः सुकण्टकः ॥१५॥

चन्द्रचूडश्चन्द्रधरश्चन्द्रमौलिः शशाङ्कभृत् ।
शशिकान्तः शशाङ्कांतः शशाङ्काङ्किमूर्धजः ॥१६॥

शशाङ्कवदनो वीरो वरदो वरलोचनः ।
शरच्चन्द्रसमाभासः शरदिन्दुसमप्रभः ॥१७॥

कोटिसूर्यप्रतीकाशश्चन्द्रास्यश्चंद्रशेखरः ।
अष्टमूर्तिर्महामूर्तिर्भीममूर्तिर्भयानकः ॥१८॥

भयदाता भयत्राता भयहर्तृभयोज्झितः ।
निर्मूलो भूतवन्द्यश्च भूतात्मा भूतभावनः ॥१९॥

कौपीनवासा दुर्वासा विवासाः कामिनीपतिः ।
करालः कीर्तिदो वैद्यः किशोर कामनाशनः ॥२०॥

कीर्तिरूपः कुन्तधारी कालकूटकृताशनः ।
कालकूटसुरूपी च कुलमन्त्रप्रदीपकः ॥२१॥

कलाकाष्ठात्मकः काशीविहारी कुटिलाननः ।
महाकाननसंवासो कालीप्रीतिविवर्धनः ॥२२॥

कालीचरः कामचारिकुलकीर्तिविवर्धनः ।
कामाद्रिः कामुकवरः कार्मुकी काममोहितः ॥२३॥

कटाक्षः कनकाभासः कनकोज्ज्वलगात्रकः ।
कामातुरः क्वणत्पादः कुटिलभ्रुकुटीधरः ॥२४॥

कार्तिकेयपिता कोकनदभूषणभूषितः ।
खट्वाङ्गयोद्धा खड्गी च गिरीशो गगनेश्वरः ॥२५॥

गणाध्यक्षः खेटकधृक् खर्वः खर्वतरः खगः ।
खगारूढः खगाराध्यः खेचरः खेचरेश्वरः ॥२६॥

खेचरत्वप्रदः क्षोणीपतिः खेचरमर्दकः ।
गणेश्वरो गणपिता गरिष्ठो गणभूपतिः ॥२७॥

गुरुर्गुरुतरो ज्ञेयो गङ्गापतिरमर्षणः ।
गीतप्रियो गीतरसः सुगोप्यो गोपवृन्दपः ॥२८॥

गवारूढो जगद्भर्ता गोस्वामी गोस्वरूपकः ।
गोप्रदो गोचरो गृध्रो गरुत्मान् गोकृतासनः ॥२९॥

गोपीशो गुरुतापश्च गुहावासी सुगोपितः ।
गजारूढो गजास्यश्च गजाजिनधरोऽग्रजः ॥३०॥

ग्रहाध्यक्षो ग्रहगणो दुष्टग्रहविमर्दकः ।
मानरूपी गानरतः प्रचण्डी गानविह्वलः ॥३१॥

गानमत्तो गुणी गुह्यो गुणग्रामाशयो गुणः ।
गूढबुद्धिर्गूढमूर्तिर्गूढपादविभूषितः ॥३२॥

गोप्ता गोलोकवासी च गुणवान्गुणिनां वरः ।
हरी हरितवर्णाक्षो मृत्युर्मृत्युञ्जयो हरिः ॥३३॥

हव्यभुग्हरिसम्पूज्यो हविर्हविर्भुजां वरः ।
अनादिरादिः सर्वाद्य आदितेयवरप्रदः ॥३४॥

अनन्तविक्रमी लोके लोकानां पापहारकः ।
गीष्पतिः सद्गुणोपेतः सगुणो निर्गुणो गुणी ॥३५॥

गुणप्रीतो गुणवरो गिरिजानायको गिरिः ।
गौरीभर्ता गुणाढ्यश्च गोश्रेष्ठासनसंस्थितः ॥३६॥

पद्मासनः पद्मनेत्रः पद्मतुष्टः सुपद्मकः ।
पद्मवक्त्रः पद्मकरः पद्मरूढपदाम्बुजः ॥३७॥

पद्मप्रियतमः पद्मालयः पद्मप्रकाशकः ।
पद्मकाननसंवासः पद्मकाननभुञ्जकः ॥३८॥

पद्मकाननसंवासो पद्मारण्यकृतालयः ।
प्रफुल्लवदनोत्फुल्लकमलाक्षप्रफुल्लकृत् ॥३९॥

फुल्लेन्दीवरसन्तुष्टः प्रफुल्लकमलासनः ।
फुल्लाम्भोजकरोत्फुल्लमानसः पापहारकः ॥४०॥
पापापहारी पुण्यात्मा पुण्यकीर्तिः सुपुण्यवान् ।
पुण्यः पुण्यतमो धन्यः सुपूतात्मा परात्मकः ॥४१॥
पुण्येशः पुण्यदः पुण्यनिरतः पुण्यभाजनः ।
परोपकारी पापिष्ठचालकः पापहारकः ॥४२॥
पुरातनः पूर्वहीनः परद्रोहर्विवर्जितः ।
पीवरः पीवरमुखः पीनकामः पुरान्तकः ॥४३॥
पाशी पशुपतिः पाशहस्तः पाषाणविद्पतिः ।
पलात्मकः परावेता पाशवद्धविमोचकः ॥४४॥
पशूनामधिपः पाशच्छेत्ता पाशविभेदकः ।
पाषाणधारी पाषाणशयानः पाशिपूजितः ॥४५॥
पश्वारूढः पुण्यधनुः पुष्पवृन्दसुपूजितः ।
पुण्डरीकः पीतवासा पुण्डरीकाक्षवल्लभः ॥४६॥
पानपात्रकरः पानमत्तः पानातिभूतकः ।
पोष्टा पोष्टवरः पूतः परित्राताऽखिलेश्वरः ॥४७॥
पुण्डरीकाक्षकर्ता च पुण्डरीकाक्षसेवितः ।
पल्लवस्थः प्रपीठस्थः पीठभूमिनिवासकः ॥४८॥
पिता पितामहः पार्थप्रसन्नाभीष्टदायकः ।
पितृणां प्रीतिकर्ता च प्रीतिदः प्रीतिभाजनः ॥४९॥
प्रीत्यात्मकः प्रीतिवशी सुप्रीतः प्रीतिकारकः ।
प्रीतिहृत्प्रीतिरूपात्मन् प्रीतियुक्तस्त्वमेव हि ॥५०॥
प्रणतार्तिहरः प्राणवल्लभः प्राणदायकः ।
प्राणी प्राणस्वरूपश्च प्राणग्राही सुनिर्दयः ॥५१॥
प्राणनाथः प्रीतमनाः सर्वेषां प्रपितामहः ।
वृद्धः प्रवृद्धरूपश्च प्रेतः प्रणयिनां वरः ॥५२॥
पराधीशः परं ज्योतिः परनेत्रः परात्मकः ।
पारुष्यरहितः पुत्री पुत्रदः पुत्ररक्षकः ॥५३॥

पुत्रप्रियः पुत्रवश्यः पुत्रवत्परिपालकः ।
परित्राता परावासः परचेताः परेश्वरः ॥५४॥

पतिः सर्वस्य सम्पाल्यः पवमानः परान्तकः ।
पुरहा पुरुहूतश्च त्रिपुरारिः पुरान्तकः ॥५५॥

पुरन्दरातिसम्पूज्यः प्रधर्षो दुष्प्रघर्षणः ।
पटुः पटुतरः प्रौढः प्रपूज्यः पर्वतालयः ॥५६॥

पुलिनस्थः पुलस्त्याख्यः पिङ्गचक्षुः प्रपन्नगः ।
अभीरुरसिताङ्गश्च चण्डरूपः सिताङ्गकः ॥५७॥

सर्वविद्याविनोदश्च सर्वसौख्ययुतः सदा ।
सुखहर्ता सर्वमुखी सर्वलोकैकपावनः ॥५८॥

सदावनः सारदश्च सुसिद्धः शुद्धरूपकः ।
सारः सारतरः सूर्यः लोभः सर्वप्रकाशकः ॥५९॥

सोममण्डलधारी च समुद्रः सिन्धुरूपवान् ।
सुरज्येष्ठः सुरश्रेष्ठः सुरासुरनिषेवितः ॥६०॥

सर्वधर्मविनिर्मुक्तः सर्वलोकनमस्कृतः ।
सर्वाचारयुतः सौरः शाक्तः परमवैष्णवः ॥६१॥

सर्वधर्मविधानज्ञः सर्वाचारपरायणः ।
सर्वरोगप्रशमनः सर्वरोगापहारकः ॥६२॥

प्रकृष्टात्मा महात्मा च सर्वधर्मप्रदर्शकः ।
सर्वसम्पद्युतः सर्वसम्पद्दानसमेक्षणः ॥६३॥

सहास्यवदनो हास्यमुक्तः प्रहसिताननः ।
साक्षी समक्षवक्ता च सर्वदर्शी समस्तवित् ॥६४॥

सकलज्ञः समर्थज्ञः सुमनाः शैवपूजितः ।
शोकप्रशमनः शोकहन्ताऽशोच्यः शुभान्वितः ॥६५॥

शैलज्ञः शैलजानाथः शैलनाथः शनैश्चरः ।
शशाङ्कसदृशज्योतिः शशाङ्कार्धविराजितः ॥६६॥

साधुप्रियः साधुतमः साध्वीपतिरलौकिकः ।
शून्यरूपः शून्यदेहः शून्यस्थः शून्यभावनः ॥६७॥

शून्यगामी श्मशानस्थः श्मशानाधिपतिः सुवाक् ।
शतसूर्यप्रभः सूर्यः सूर्यदीप्तः सुरारिहा ।
शुभान्वितः शुभतनुः शुभबुद्धिः शुभात्मकः ॥६८॥

शुभान्विततनुः शुक्लतनुः शुक्लप्रभान्वितः ।
सुशौक्लः शुक्लदशनः शुक्लाभः शुक्लमाल्यधृक् ॥६९॥

शुक्लपुष्पप्रियः शुक्लवसनः शुक्लकेतनः ।
शेषालङ्करणः शेषरहितः शेषवेष्टितः ॥७०॥

शेषारूढः शेषशायी शेषाङ्गदविराजितः ।
सतीप्रियश्च साशंकः समदर्शी समाधिमान् ॥७१॥

सत्सङ्गी सत्प्रियः सङ्गो निःसङ्गो सङ्गवर्जितः ।
सहिष्णुः शाश्वतैश्वर्यः सामगानरतः सदा ॥७२॥

सामवेत्ता साम्यतरः श्यामापतिरशेषभुक् ।
तारिणीपतिराताम्रनयनस्त्वरिताप्रियः ॥७३॥

सारात्मकस्त्वग्वसनस्तरुणीरमणे रतः ।
तृप्तिरूपस्तृप्तिकर्ता त्वारकारिनिषेवितः ॥७४॥

वायुकेशो भैरवेशो भवानीशो भवान्तकः ।
भवबन्धुर्भवहरो भवबन्धनमोचकः ॥७५॥

अभिभूतोऽभिभूतात्मा सर्वभूतप्रमोहकः ।
भुनवेशो भूतपूज्यो भोगमोक्षफलप्रदः ॥७६॥

दयालुर्दीननाथश्च दुःसहो दैत्यमर्दकः ।
दक्षकन्यापतिर्दुःखनाशको धनधान्यदः ॥७७॥

दयावान् दैवतश्रेष्ठो देवगन्धर्वसेवितः ।
नानायुधधरो नानापुण्यगुच्छविराजितः ॥७८॥

नानासुखप्रदो नानामूर्तिचारी च नर्तकः ।
नित्यविज्ञानसंयुक्तो नित्यरूपोऽनिलोऽनलः ॥७९॥

लब्धवर्णो लघुतरो लघुत्वपरिवर्जितः ।
लोलाक्षो लोकसम्पूज्यो लावण्यपरिसंयुतः ॥८०॥
नूपुरीन्यासससंस्थश्च नागेशो नगपूजितः ।
नारायणो नारदश्च नानाभरणभूषितः ॥८१॥
नगभूतो नग्नदेशो नग्नः सानन्दमानसः ।
नभस्यो नतनाभिश्च नम्रमूर्धाभिवन्दितः ॥८२॥
नन्दिकेशो नन्दिपूज्यो नानानीरजभव्यगः ।
नवीनविल्वपत्रौघतुष्टो नवधनद्युतिः ॥८३॥
नन्दः सानन्द आनन्दमयश्चानन्दविह्वलः ।
नालसंस्थः शोभनस्थः सुस्थः सुस्थमतिस्तथा ॥८४॥
स्वल्पासनो भीमरुचिर्भुवनान्तकराम्बुदः ।
आसन्नः सिकसालीनो वृषासीनो वृषासनः ॥८५॥
वैरस्यरहितो वार्यो व्रती व्रतपरायणः ।
ब्राह्म्यो विद्यामयो विद्याभ्यासी विद्यापतिस्तथा ॥८६॥
घण्टाकारो घोटकस्थो घोररावघनस्वनः ।
छूर्णचक्षुरघूर्णात्मा घोरहासो गभीरधीः ॥८७॥
चण्डीपतिश्चण्डमूर्तिश्चंडमुण्डी प्रचण्डवाक् ।
चितासंस्थश्चितावासश्चितिदण्डकरः सदा ॥८८॥
चिताभस्माभिसंलिप्तश्चितानृत्यपरायणः ।
चिताप्रमोदो चित्साक्षी चिन्तामणिरचिन्तकः ॥८९॥
चतुर्वेदमयश्चक्षुश्चतुराननपूजितः ।
चिरवासाश्चकोराक्षश्चलन्मूर्तिश्चलेक्षणः ॥९०॥
चलत्कुण्डलभूषाढ्यश्चलद्भूषणभूषितः ।
चलन्नेत्रश्चलत्पादश्चलन्नूपुरराजितः ॥९१॥
स्थावरः स्थिरमूर्तिश्च स्थावरेशः स्थिरासनः ।
स्थापकास्थैर्यनिरतः स्थूलरूपी स्थलालयः ॥९२॥

स्थैर्यातिपः स्थितिपरः स्थाणुरूपी स्थलाधिपः ।
ऐहिको मदनांतश्च महीमण्डलपूजितः ॥९३॥

महीप्रियो मत्तरवो मीनकेतुविमर्दकः ।
मीनरूपो मीनसंस्थो मृगहस्तो मृगासनः ॥९४॥

मार्गस्थो मेखलायुक्तो मैथिलीश्वरपूजितः ।
मिथ्याहीनो मङ्गलदो माङ्गल्यो मकरासनः ॥९५॥

मत्स्यप्रियो मधुरगीर्मधुपानपरायणः ।
मुदुवाक्यपरः सौरप्रियो मोदान्वितस्तथा ॥९६॥

मुण्डालिर्भूषणो दण्डी उद्दण्डोज्ज्वललोचनः ।
असाध्यसाधकः शूरसेव्यः शोकापनोदनः ॥९७॥

श्रीपतिः श्रीसुसेव्यश्च श्रीधरः श्रीनिकेतनः ।
श्रीमतां श्रीस्वरूपश्च श्रीमाञ्श्रीनिलयस्तथा ॥९८॥

श्रमादिक्लेशरहितः श्रीनिवासः श्रियान्वितः ।
श्रद्धालुः श्राद्धदेवश्च श्राद्धो मधुरवाक्तथा ॥९९॥

प्रलयाग्न्यर्कसंकाशः प्रमत्तनयनोज्ज्वलः ।
असाध्यसाधकः शूरसेव्यः शोकापनोदनः ॥१००॥

विश्वभूतमयो वैश्वानरनेत्रोऽधिमोहकृत् ।
लोकत्राणपरोऽपारगुणः पारविवर्जितः ॥१०१॥

अग्निजिह्वो द्विजास्यश्च विश्वास्यः सर्वभूतधृक् ।
खेचरः खेचराधीशो सर्वगः सार्वलौकिकः ॥१०२॥

सेनानीजनकः क्षुब्धाब्धिवारिक्षोभविनाशकः ।
कपालविलसद्धस्तः कमण्डलुभृदर्चितः ॥१०३॥

केवलात्मस्वरूपश्च केवलज्ञानरूपकः ।
व्योमालयनिवासी च बृहद्व्योमत्वरूपकः ॥१०४॥

अम्भोजनयनाम्भोधिशयानः पुरुषातिगः ।
निरालम्बावलम्बश्च सम्भागानन्यरूपकः ॥१०५॥

योगनिद्रामयो लोकप्रमोहापहरात्मकः ।
बृहद्वक्त्रो बृहन्नेत्रो बृहद्बाहुर्बृहद्बलः ॥१०६॥

बृहत्सर्पाङ्गदो दुष्टबृहद्बालविमर्दकः ।
बृहद्भुजबलोन्मत्तो बृहत्तुण्डो बृहद्वपुः ॥१०७॥

बृहदैश्वर्ययुक्तश्च बृहदैश्वर्यदः स्वयम् ।
बृहत्सम्भोगसन्तुष्टो बृहदानन्ददायकः ॥१०८॥

बृहज्जटाजूटधरो बृहन्माली बृहद्धनुः ।
इन्द्रियाधिष्ठितः सर्वलोकेन्द्रियविमोहकृत् ॥१०९॥

सर्वेन्द्रियोप्रवृत्तिकृत् सर्वेन्द्रियनिवृत्तिकृत् ।
प्रवृत्तिनायकः सर्वविपत्तिपरिनाशकः ॥११०॥

प्रवृत्तिमार्गनेता त्वं स्वतन्त्रेच्छामयः स्वयम् ।
सत्प्रवृत्तिरतो नित्यं दयानन्दशिवाधरः ॥१११॥

क्षितिरूपस्तोयरूपी विश्वतृप्तिकरस्तथा ।
तर्पस्तर्पणसम्प्रीतिस्तर्पकस्तर्पणात्मकः ॥११२॥

तृप्तिकारणभूतश्च सर्वतृप्तिप्रसाधकः ।
अभेदाभदकोच्छिद्यच्छेदकोऽछेद्य एव हि ॥११३॥

अचिन्तधन्वाच्छिन्नेषुरच्छिन्नध्वजवाहनः ।
अघृष्टः समघृष्टास्त्रः समघृष्ट्यबलोन्नतः ॥११४॥

चित्रयोधी चित्रकर्मा विश्वसङ्कर्षकः स्वयम् ।
भक्तानामीप्सितकरः सर्वेप्सितफलप्रदः ॥११५॥

वाञ्छिताभीष्टफलदो भिन्नज्ञानप्रवर्तकः ।
बोधनात्मा बोधनार्थातिगः सर्वप्रबोधकृत् ॥११६॥

त्रिजटश्चैकजटिलश्चलज्जूटभयानकः ।
जटाटीनो जटाजूटस्पृष्टावरवचः स्वयम् ॥११७॥

षाण्मातुरस्य जनकः शक्तिप्रहरतां वरः ।
अनर्घास्त्रप्रहारी वानर्घधन्वा महार्घ्यपात् ॥११८॥

योनिमण्डलमध्यस्थः मुखयोनिरजृम्भनः ।
महाद्रिसदृशः श्वेतः श्वेतपुष्पस्रगन्वितः ॥११९॥

मकरन्दप्रियो नित्यं मासर्तुहायनात्मकः ।
नानापुष्पप्रसूर्नानापुष्पैरर्चितगात्रकः ॥१२०॥

षडङ्गयोगनिरतः सदायोगार्द्रमानसः ।
सुरासुरनिषेव्याङ्घ्रिर्विलसत्पादपङ्कजः ॥१२१॥

सुप्रकाशितवक्त्राब्जः सितेतरगलोज्वलः ।
वैनतेयसमारूढः शरदिन्दुसहस्रवत् ॥१२२॥

जाज्वल्यमानं तेजोभिर्ज्वालापुञ्जो यमः स्वयम् ।
प्रज्वलद्विद्युदाभश्च साट्टहासभयङ्करः ॥१२३॥

प्रलयानलरूपी च प्रलयाग्निरुचिः स्वयम् ।
जगतामेकपुरुषो जगतां प्रलयात्मकः ॥१२४॥

प्रसीद त्वं जगन्नाथ जगद्योने नमोऽस्तु ते ॥१२५॥

॥ श्री महादेव उवाच ॥

एवं नामसहस्रेण राज्ञा वै संस्तुतो हरः ।
प्रत्यक्षमगमत्तस्य सुप्रसन्नमुखाम्बुजः ॥१२६॥

स तं विलोक्य त्रिदशैकनाथं पञ्चाननं श्वेतरुचिं प्रसन्नम् ।
वृषाधिरूढं भुजगाङ्गदैर्युतं ननर्त राजा धरणीभुजां वरः ॥१२७॥

प्रोवाच चेदं परमेश्वराद्य मे एतानि सर्वाणि सुखार्थकानि ।
तपश्च होमश्च मनुष्यजन्म यत्त्वां प्रपश्यामि दृशा परेशम् ॥१२८॥

मत्तो न धन्योस्ति महीतले वा स्वर्गे यतस्त्वं मम नेत्रगोचरः ।
सुरासुराणामपि दुर्लभेक्षणः परात्परः पूर्णमयो निरामयः ॥१२९॥

ततस्तमेवं प्रतिभाषमाणं प्राह प्रसन्नार्तिहरो महेश्वरः ।
किं ते मनोवाञ्छितमेव विद्यते वृणुष्व तत्पुत्र ददामि तुभ्यम् ॥१३०॥

■

७ श्रीशिवसहस्रनामस्तोत्रम्

स्थिरः स्थाणुः प्रभुर्भीमः प्रवरो वरदो वरः ।
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः ॥१॥

जटी चर्मी शिखण्डी च सर्वाङ्गः सर्वभावनः ।
हरश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः ॥२॥

प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः ।
श्मशानवासी भगवान् खचरो गोचरोऽर्दनः ॥३॥

अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।
उन्मत्तवेषप्रच्छन्नः सर्वलोकप्रजापतिः ॥४॥

महारूपो महाकायो वृषरूपो महायशाः ।
महात्मा सर्वभूतात्मा विश्वरूपो महाहनुः ॥५॥

लोकपालोऽन्तर्हितात्मा प्रसादो हयगर्दभिः ।
पवित्रं च महांश्चैव नियमो नियमाश्रितः ॥६॥

सर्वकर्मा स्वयम्भूत आदिरादिकरो निधिः ।
सहस्राक्षो विशालाक्षः सोमो नक्षत्रसाधकः ॥७॥

चन्द्रः सूर्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः ।
अत्रिरत्र्या नमस्कर्ता मृगबाणार्पणोऽनघः ॥८॥

महातपा घोरतपा अदीनो दीनसाधकः ।
संवत्सरकरो मन्त्रः प्रमाणं परमं तपः ॥९॥

योगी योज्यो महाबीजो महारेता महाबलः ।
सुवर्णरेताः सर्वज्ञः सुबीजो बीजवाहनः ॥१०॥

दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ।
विश्वरूपः स्वयं श्रेष्ठो बलवीरोऽबलो गणः ॥११॥

गणकर्ता गणपतिर्दिग्वासाः काम एव च ।
मन्त्रवित् परमो मन्त्रः सर्वभावकरो हरः ॥१२॥

कमण्डलुधरो धन्वी बाणहस्तः कपालवान् ।
अशनी शतध्नी खड्गी पट्टिशी चायुधी महान् ॥१३॥

स्रवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः ।
उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा ॥१४॥

दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ।
श्रृगालरुपः सिद्धार्थो मुण्डः सर्वशुभङ्करः ॥१५॥

अजश्च बहुरूपश्च गन्धधारी कपर्द्यपि ।
ऊर्ध्वरिता ऊर्ध्वलिङ्ग ऊर्ध्वशायी नभःस्थलः ॥१६॥

त्रिजटी चीरवासाश्च रुद्रः सेनापतिर्विभुः ।
अहश्चरो नक्तंचरस्तिग्ममन्युः सुवर्चसः ॥१७॥

गजहा दैत्यहा कालो लोकधाता गुणाकरः ।
सिंहशार्दूलरुपश्च आर्द्रचर्माम्बरावृतः ॥१८॥

कालयोगी महानादः सर्वकामश्चतुष्पथः ।
निशाचरः प्रेतचारी भूतचारी महेश्वरः ॥१९॥

बहुभूतो बहुधरः स्वर्भानुरमितो गतिः ।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलालसः ॥२०॥

घोरो महातपाः पाशो नित्यो गिरिरुहो नभः ।
सहस्रहस्तो विजयो व्यवसायो ह्यतन्द्रितः ॥२१॥

अघर्षणो घर्षणात्मा यज्ञहा कामनाशकः ।
दक्षयागापहारी च सुसहो मध्यमस्तथा ॥२२॥

तेजोऽपहारी बलहामुदितोऽर्थोऽजितोऽवरः ।
गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः ॥२३॥

न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ।
सुतीक्ष्णदशनश्चैव महाकायो महाननः ॥२४॥
विष्वक्सेनो हरिर्यज्ञः संयुगापीडवाहनः ।
तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित् ॥२५॥

विष्णुप्रसादितो यज्ञः समुद्रो वडवामुखः ।
हुताशनसहायश्च प्रशान्तात्मा हुताशनः ॥२६॥

उग्रतेजा महातेजा जन्यो विजयकालवित् ।
ज्योतिषामयनं सिद्धिः सर्वविग्रह एव च ॥२७॥

शिखी मुण्डी जटी ज्वाली मूर्तिजो मूर्द्धगो बली ।
वेणवी पणवी ताली खली कालकटंकटः ॥२८॥

नक्षत्रविग्रहमतिर्गुणबुद्धिर्लयोऽगमः ।
प्रजापतिर्विश्वबाहुर्विभागः सर्वगोऽमुखः ॥२९॥

विमोचनः सुसरणो हिरण्यकवचोद्भवः ।
मेढ्रजो बलचारी च महीचारी स्रुतस्तथा ॥३०॥

सर्वतूर्यनिनादी च सर्वातोद्यपरिग्रहः ।
व्यालरूपो गुहावासी गुहो माली तरङ्गवित् ॥३१॥

त्रिदशस्त्रिकालधृक् कर्मसर्वबन्धविमोचनः ।
बन्धनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ॥३२॥

सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागज्ञोऽतुल्यो यज्ञविभागवित् ॥३३॥

सर्ववासः सर्वचारी दुर्वासा वासवोऽमरः ।
हैमो हेमकरोऽयज्ञः सर्वधारी धरोत्तमः ॥३४॥

लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः ।
संग्रहो निग्रहः कर्ता सर्वचीरनिवासनः ॥३५॥

मुख्योऽमुख्यश्च देहश्च काहलिः सर्वकामदः ।
सर्वकालप्रसादश्च सुबलो बलरूपधृक् ॥३६॥
सर्वकामवरश्चैव सर्वदः सर्वतोमुखः ।
आकाशनिर्विरूपश्च निपाती ह्यवशः खगः ॥३७॥

रौद्ररूपोंऽशुरादित्यो बहुरश्मिः सवर्चसी ।
वसुवेगो महावेगो मनोवेगो निशाचरः ॥३८॥

सर्ववासी श्रियावासी उपदेशकरोऽकरः ।
मुनिरात्मनिरालोकः सम्भग्नश्च सहस्रदः ॥३९॥

पक्षी च पक्षरूपश्च अतिदीप्तो विशाम्पतिः ।
उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः ॥४०॥

वामदेवश्च वामश्च प्राग् दक्षिणश्च वामनः ।
सिद्धयोगी महर्षिश्च सिद्धार्थः सिद्धसाधकः ॥४१॥

भिक्षुश्च भिक्षुरूपश्च विपणो मृदुरव्ययः ।
महासेनो विशाखश्च षष्टिभागो गवां पतिः ॥४२॥

वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च ।
वृत्तावृत्तकरस्तालो मधुर्मधुकलोचनः ॥४३॥

वाचस्पत्यो वाजसनो नित्यमाश्रमपूजितः ।
ब्रह्मचारी लोकचारी सर्वचारी विचारवित् ॥४४॥

ईशान ईश्वरः कालो निशाचारी पिनाकवान् ।
निमित्तस्थो निमित्तं च नन्दिर्नन्दिकरो हरिः ॥४५॥

नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्द्धनः ।
भगहारी निहन्ता च कालो ब्रह्मा पितामहः ॥४६॥

चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ।
लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः ॥४७॥

बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः ।
इतिहासः सकल्पश्च गौतमोऽथ निशाकरः ॥४८॥

दम्भो ह्यदम्भो वैदम्भो वश्योवशकरः कलिः ।
लोककर्ता पशुपतिर्महाकर्ता ह्यनौषधः ॥४९॥
अक्षरं परमं ब्रह्म बलवच्छक्र एव च ।
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो गतागतः ॥५०॥

बहुप्रसादः सुस्वप्नो दर्पणोऽथ त्वमित्रजित् ।
वेदकारो मन्त्रकारो विद्वान् समरमर्दनः ॥५१॥

महामेघनिवासी च महाघोरो वशी करः ।
अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः ॥५२॥

वृषणः शङ्करो नित्यं वर्चस्वी धूमकेतनः ।
नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः ॥५३॥

स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः ।
उत्सङ्गश्च महाङ्गश्च महागर्भपरायणः ॥५४॥

कृष्णवर्णः सुवर्णश्च इन्द्रियं सर्वदेहिनाम् ।
महापादो महाहस्तो महाकायो महायशाः ॥५५॥

महामूर्धा महामात्रो महानेत्रो निशालयः ।
महान्तको महाकर्णो महोष्ठश्च महाहनुः ॥५६॥

महानासो महाकम्बुर्महाग्रीवः श्मशानभाक् ।
महावक्षा महोरस्को ह्यन्तरात्मा मृगालयः ॥५७॥

लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः ।
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः ॥५८॥

महानखो महारोमा महाकोशो महाजटः ।
प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः ॥५९॥

स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ॥६०॥

गण्डली मेरुधामा च देवाधिपतिरेव च ।
अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः ॥६१॥

यजुःपादभुजो गुह्यः प्रकाशो जङ्गमस्तथा ।
अमोघार्थः प्रसादश्च अभिगम्यः सुदर्शनः ॥६२॥

उपकारः प्रिय सर्वः कनकः काञ्चनच्छविः ।
नाभिर्नन्दिकरो भावः पुष्करस्थपतिः स्थिरः ॥६३॥

द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः ।
नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥६४॥

सगणो गणकारश्च भूतवाहनसारथिः ।
भस्मशयो भस्मगोप्ता भस्मभूतस्तरुर्गणः ॥६५॥

लोकपालस्तथालोको महात्मा सर्वपूजितः ।
शुक्लस्त्रिशुक्लः सम्पन्नः शुचिर्भूतनिषेवितः ॥६६॥

आश्रमस्थः क्रियावस्थो विश्वकर्ममतिर्वरः ।
विशालशाखस्ताम्रोष्ठो ह्यम्बुजालः सुनिश्चलः ॥६७॥

कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः ।
गन्धर्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुशारदः ॥६८॥

परश्वधायुधो देवो अनुकारी सुबान्धवः ।
तुम्बवीणो महाक्रोध उर्ध्वरिता जलेशयः ॥६९॥

उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दितः ।
सर्वाङ्गरूपो मायावी सुहृदो ह्यनिलोऽनलः ॥७०॥

बन्धनो बन्धकर्ता च सुबन्धनविमोचनः ।
सयज्ञारिः सकामारिर्महादंष्ट्रो महायुधः ॥७१॥

बहुधा निन्दितः शर्वः शङ्करः शङ्करोऽधनः ।
अमरेशो महादेवो विश्वदेवः सुरारिहा ॥७२॥

अहिर्बुध्न्योऽनिलाभश्च चेकितानो हविस्तथा ।
अजैकपाच्च कापाली त्रिशंकुरजितः शिवः ॥७३॥
धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥७४॥

प्रभावः सर्वगो वायुरर्यमा सविता रविः ।
उषङ्गुश्च विधाता च मान्धाता भूतभावनः ॥७५॥

विभुर्वर्णविभावी च सर्वकामगुणावहः ।
पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ॥७६॥

बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी ।
कुरुकर्ता कुरुवासी कुरुभूतो गुणौषधः ॥७७॥

सर्वाशयो दर्भचारी सर्वेषां प्राणिनां पतिः ।
देवदेवः सुखासक्तः सदसत्सर्वरत्नवित् ॥७८॥

कैलासगिरिवासी च हिमवद्गिरिसंश्रयः ।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः ॥७९॥
वणिजो वर्धकी वृक्षो बकुलश्चन्दनश्छदः ।
सारग्रीवो महाजत्रुरलोलश्च महौषधः ॥८०॥

सिद्धार्थकारी सिद्धार्थश्छन्दोव्याकरणोत्तरः ।
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ॥८१॥

प्रभावात्मा जगत्कालस्थालो लोकहितस्तरुः ।
सारङ्गो नवचक्राङ्गः केतुमाली सभावनः ॥८२॥

भूतालयो भूतपतिरहोरात्रमनिन्दितः ॥८३॥

वाहिता सर्वभूतानां विलयश्च विभुर्भवः ।
अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः ॥८४॥

धृतिमान् मतिमान् दक्षः सत्कृतश्च युगाधिपः ।
गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरिः ॥८५॥

हिरण्यबाहुश्च तथा गुहापालः प्रवेशिनाम् ।
प्रकृष्टारिर्महाहर्षो जितकामो जितेन्द्रियः ॥८६॥

गान्धारश्च सुवासश्च तपःसक्तो रतिर्नरः ।
महागीतो महानृत्यो ह्यप्सरोगणसेवितः ॥८७॥

महाकेतुर्महाधातुर्नैकसानुचरश्चलः ।
आवेदनीय आदेशः सर्वगन्धसुखावहः ॥८८॥

तोरणस्तारणो वातः परिधी पतिखेचरः ।
संयोगो वर्धनो वृद्धो अतिवृद्धो गुणाधिकः ॥८९॥

नित्य आत्मसहायश्च देवासुरपतिः पतिः ।
युक्तश्च युक्तबाहुश्च देवो दिविसुपर्वणः ॥९०॥

आषाढश्च सुषाढश्च ध्रुवोऽथ हरिणो हरः ।
वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथः ॥९१॥

शिरोहारी विमर्शश्च सर्वलक्षणलक्षितः ।
अक्षश्च रथयोगी च सर्वयोगी महाबलः ॥९२॥

समाम्नायोऽसमाम्नायस्तीर्थदेवो महारथः ।
निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः ॥९३॥

रत्नप्रभूतो रत्नाङ्गो महार्णवनिपानवित् ।
मूलं विशालो ह्यमृतो व्यक्ताव्यक्तस्तपोनिधिः ॥९४॥

आरोहणोऽधिरोहश्च शीलधारी महायशाः ।
सेनाकल्पो महाकल्पो योगो युगकरो हरिः ॥९५॥

युगरूपो महारूपो महानागहनोऽवधः ।
न्यायनिर्वपणः पादः पण्डितो ह्यचलोपमः ॥९६॥

बहुमालो महामालः शशी हरसुलोचनः ।
विस्तारो लवणः कूपस्त्रियुगः सफलोदयः ॥९७॥

त्रिलोचनो विषणाङ्गो मणिविद्धो जटाधरः ।
बिन्दुर्विसर्गः सुमुखः शरः सर्वायुधः सहः ॥९८॥

निवेदनः सुखाजातः सुगन्धारो महाधनुः ।
गन्धपाली च भगवानुत्थानः सर्वकर्मणाम् ॥९९॥

मन्थानो बहुलो वायुः सकलः सर्वलोचनः ।
तलस्तालः करस्थाली उर्ध्वसंहननो महान् ॥१००॥

छत्रं सुच्छत्रो विख्यातो लोकः सर्वाश्रयः क्रमः ।
मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः ॥१०१॥

हर्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात् ।
सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः ॥१०२॥

सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ।
पवित्रं त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिङ्गलः ॥१०३॥

ब्रह्मदण्डविनिर्माता शतघ्नीपाशशक्तिमान् ।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥१०४॥

गभस्तिर्ब्रह्मकृद् ब्रह्मी ब्रह्मविद् ब्राह्मणो गतिः ।
अनन्तरूपो नैकात्मा तिग्मतेजाः स्वयम्भुवः ॥१०५॥

उर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ।
चन्दनी पद्मनालाग्रः सुरभ्युत्तरणो नरः ॥१०६॥

कर्णिकारमहास्रग्वी नीलमौलिः पिनाकधृत् ।
उमापतिरुमाकान्तो जाह्नवीधृदुमाधवः ॥१०७॥

वरो वराहो वरदो वरेण्यः सुमहास्वनः ।
महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥१०८॥

पीतात्मा परमात्मा च प्रयतात्मा प्रधानधृत् ।
सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणो वरः ॥१०९॥

चराचरात्मा सूक्ष्मात्मा अमृतो गोवृषेश्वरः ।
साध्यर्षिर्वसुरादित्यो विवस्वान् सवितामृतः ॥११०॥

व्यासः सर्गः सुसंक्षेपो विस्तरः पर्ययो नरः ।
ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः ॥१११॥

कलाः काष्ठा लवा मात्रा मुहूर्ताहःक्षपाः क्षणाः ।
विश्वक्षेत्रं प्रजाबीजं लिङ्गमाद्यस्तु निर्गमः ॥११२॥

सदसद् व्यक्तमव्यक्तं पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥११३॥

निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परा गतिः ।
देवासुरविनिर्माता देवासुरपरायणः ॥११४॥

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुरगणाश्रयः ॥११५॥

देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।
देवातिदेवो देवर्षिर्देवासुरवरप्रदः ॥११६॥

देवासुरेश्वरो विश्वो देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिन्त्यो देवतात्माऽऽत्मसम्भवः ॥११७॥

उद्भित् त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः ।
ईड्यो हस्तीश्वरो व्याघ्रो देवसिंहो नरर्षभः ॥११८॥

विबुधोऽग्रवरः सूक्ष्मः सर्वदेवस्तपोमयः ।
सुयुक्तः शोभनो वज्री प्रासानां प्रभवोऽव्ययः ॥११९॥

गुहः कान्तो निजः सर्गः पवित्रं सर्वपावनः ।
श्रृंगी श्रृङ्गप्रियो बभ्रू राजराजो निरामयः ॥१२०॥

अभिरामः सुरगणो विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ॥१२१॥

स्थावराणां पतिश्चैव नियमेन्द्रियवर्धनः ।
सिद्धार्थः सिद्धभूतार्थोऽचिन्त्यः सत्यव्रतः शुचिः ॥१२२॥

व्रताधिपः परं ब्रह्म भक्तानां परमा गतिः ।
विमुक्तो मुक्ततेजाश्च श्रीमाञ्श्रीवर्धनो जगत् ॥१२३॥

यथाप्रधानं भगवानिति भक्त्या स्तुतो मया ।
यन्न ब्रह्मादयो देवा विदुस्तत्त्वेन निर्षयः ॥१२४॥

स्तोतव्यमर्च्यं वन्द्यं च कः स्तोष्यति जगत्पतिम् ।

इतिशिव सहस्रनाम स्तोत्रं संपूर्णम्

■

८ श्रीशिवसहस्रनामस्तोत्रम्

विष्णुरुवाच

भवः शिवो हरो रुद्रः पुष्कलो मुद्रलोचनः ।
अग्रगण्यः सदाचारः सर्व शंभुर्महेश्वरः ॥१॥

ईश्वरः स्थाणुरीशानः सहस्राक्षः सहस्रपात् ।
वरीयान्वरदो वन्द्यः शंकरः परमेश्वर ॥२॥

गङ्गाधरः शूलधरः परार्थैकप्रयोजकः ।
सर्वज्ञः सर्वदेवादिर्गिरिधन्वा जटाधरः ॥३॥

चन्द्रापीडश्चन्द्रमौलिर्वेधा विश्वामरेश्वरः ।
वेदान्तसारसंदोहः कपाली नीललोहितः ॥४॥

ध्यानाहारोऽपरिच्छेद्यो गौरीभर्त्ता गणेश्वरः ।
अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गः स्वर्गसाधनः ॥५॥

ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः ।
वामदेवो महादेवः पटुः परिवृढो दृढः ॥६॥

विश्वरूपो विरुपाक्षो वागीशः श्रुतिमन्तगः ।
सर्वप्रणवसंवादी वृषाङ्को वृषवाहनः ॥७॥

ईशः पिनाकी खट्वाङ्गी त्रिवेषश्चिरंतनः ।
मनोमयो महायोगी स्थिरो ब्रह्माण्डधूर्जटी ॥८॥

कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः ।
नागचूडः सुचक्षुष्यो दुर्वासाः पुरशासनः ॥९॥

दृगायुधः स्कन्दगुरुः परमेष्ठी परायणः ।
अनादिमध्यनिधनो गिरिशो गिरिजाधवः ॥१०॥

कुबेरबन्धुः श्रीकण्ठो लोकवन्दोत्तमो मृदुः ।
सामान्यो देवको दण्डी नीलकण्ठः परश्वधी ॥११॥

विशालाक्षो महाव्याधः सुरेशः सूर्यतापनः ।
धर्मधामा क्षमाक्षेत्रं भगवान्भगनेत्रहा ॥१२॥

उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः प्रियंवदः ।
दाता दयाकरो दक्षः कपर्दी कामशासनः ॥१३॥

श्मशाननिलयस्तिष्यः श्मशानस्थो महेश्वरः ।
लोककर्ता भूतपतिर्महाकर्ता महौषधिः ॥१४॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
नीतिः सुनीतिः शुद्धात्मा सोमः सोमरतः भुंधीः ॥१५॥

सोमपोऽमृतपः सौम्यो महानीतिर्महास्मृतिः ।
अजातशत्रुरालोक्यः संभाव्यो हव्यवाहनः ॥१६॥

लोककारो वेदकारः सूत्रकारः सनातनः ।
महर्षि कपिलाचार्यो विश्वदीप्तिर्विलोचनः ॥१७॥

पिनाकपाणिर्भूदेवः स्वस्तिकृत्स्वस्तिदः सुधो ।
धात्रीधामा धामकरः सर्वगः सर्वगोचरः ॥१८॥

ब्रह्मसृग्विश्वसृक्सर्गः कर्णिकारः प्रियः कविः ।
शाखो विशाखो गोशाखः शिवो भिषगनुत्तमः ॥१९॥

गङ्गाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थितः ।
विजितात्मा विधेयात्मा भूतवाहनसारथिः ॥२०॥

सगणो गणकायश्च सुकीर्तिश्छिन्नसंशयः ।
कामदेवः कामकालो भेस्मोद्धूलितविग्रहः ॥२१॥

भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः ।
समावृत्तो निवृत्तात्मा धर्मपुञ्जः सदाशिवः ॥२२॥

अकल्मषश्चतुर्बाहुः सर्वावासो दुरासदः ।
दुर्लभो दुर्गमो दुर्गः सर्वायुधविशारदः ॥२३॥

अध्यात्मयोगनिलयः सुतन्तुस्तन्तुवर्धनः ।
शुभाङ्गो योगसारङ्गो जगदीशो जनार्दनः ॥२४॥

भस्मशुद्धिकरो मेरुस्तेजस्वी शुद्धविग्रहः ।
हिरण्यरेतास्तरणिर्मरीचिर्महिमालयः ॥२५॥

महाह्रदो महागर्तः सिद्धवृन्दारवन्दितः ।
व्याघ्रचर्मधरो व्याली महाभूतो महानिधिः ॥२६॥

अमृतात्माऽमृतवपुः पञ्चयज्ञः प्रभञ्जनः ।
पञ्चविंशतितत्त्वस्थः पारिजातः परापरः ॥२७॥

सुलभः सुव्रतः शूरो वाग्मायैकनिधिर्निधिः ।
वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः ॥२८॥

आश्रमः क्षपणः क्षामो ज्ञानवानचलश्चलः ।
प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः ॥२९॥

धनुर्धरो धनुर्वेदो गुणराशिर्गुणाकरः ।
अनन्तदृष्टिरानन्दो दण्डो दमयिता दमः ॥३०॥

अविवाद्यो महाकायो विश्वकर्मा विशारदः ।
वीतरागो विनीतात्मा तपस्वी भूतवाहनः ॥३१॥

उन्मत्तवेषः प्रच्छन्नो जितकामो जितप्रियः ।
कल्याणप्रकृतिः कल्पः सर्वलोकप्रजापतिः ॥३२॥

तपस्वी तारको धीमान्प्रधानप्रभुरव्ययः ।
लोकपालोऽन्तर्हितात्मा कल्पादिः कमलेक्षणः ॥३३॥

वेदशास्त्रार्थतत्त्वज्ञो नियमो नियमाश्रयः ।
राहुः सूर्यः शनिः केतुर्विरामो विद्रुमच्छविः ॥३४॥

भक्तिगम्यः परं ब्रह्म मृगबाणार्पणोऽनघः ।
अद्रिद्रोणिकृतस्थानः पवनात्मा जगत्पतिः ॥३५॥

सर्वकर्माचलस्त्वष्टा मङ्गल्यो मङ्गलप्रदः ।
महातपा दीर्घतपाः स्थविष्णुः स्थविरो ध्रुवः ॥३६॥

अहः संवत्सरो व्यालः प्रमाणं परमं तपः ।
संवत्सरकरो मन्त्रः प्रत्ययः सर्वदर्शनः ॥३७॥

अजः सर्वेश्वरः सिद्धो महारेता महाबलः ।
योगी योगो महादेवः सिद्धः सर्वादिरच्युतः ॥३८॥

वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ।
अमृतः शाश्वतः शान्तो बाणहस्तः प्रतापवान् ॥३९॥

कमण्डलुधरो धन्वी वेदाङ्गो वेदविन्मुनिः ।
भ्राजिष्णुभोजनं भोक्ता लोकनेता दुराधरः ॥४०॥

अतीन्द्रियो महामायः सर्वावासश्चतुष्पथः ।
कालयोगी महानादो महोत्साहो महाबलः ॥४१॥

महाबुद्धिर्महावीर्यो भूतचारी पुरन्दरः ।
निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥४२॥

अनिर्देश्यवपुः श्रीमान्सर्वाकर्षकरो मतः ।
बहुश्रुतो बहुमायो नियतात्माऽभयोद्भवः ॥४३॥

ओजस्तेजोद्युतिधरो नर्तकः सर्वनायकः ।
नित्यघण्टाप्रियो नित्यप्रकाशात्मा प्रतापनः ॥४४॥

ऋद्धः स्पष्टाक्षरो मन्त्रः संग्रामः शारदप्लवः ।
युगादिकृद्युगावर्तो गम्भीरो वृषवाहनः ॥४५॥

इष्टो विशिष्टः शिष्टेष्टः शरभः सरभो धनुः ।
अपां निधिरधिष्ठानं विजयो जयकालवित् ॥४६॥

प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ।
विमोचनं सुरगणो विद्येशो विबुधाश्रयः ॥४७॥

बालरूपो बलोन्माथी विकर्ता गहनो गुहः ।
करणं कारणं कर्ता सर्वबन्धप्रमोचनः ॥४८॥

व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ।
दुन्दुभो ललितो विश्वो भवात्माऽऽत्मनि संस्थितः ॥४९॥

राजराजप्रियो रामो राजचूडामणिः प्रभुः ।
वीरेश्वरो वीरभद्रो वीरासनविधिर्विराट् ॥५०॥

वीरचूडामणिर्वर्तो तीव्रानन्दो नदीधरः ।
आत्माधारस्त्रिशूलाङ्कः शिपिविष्टः शिवाश्रयः ॥५१॥

वालखिल्यो महाचारस्तिग्मांशुर्वारिधिः खगः ।
अभिरामः सुशरण्यः सुब्रह्मण्यः सुधापतिः ॥५२॥

मधुमान्कौशिको गोमान्विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेहः सारः संसारचक्रभृत् ॥५३॥

अमोघदण्डो मध्यस्थो हिरण्यो ब्रह्मवर्चसी ।
परब्रह्मपदो हंसः शबरो व्याघ्रकोऽनलः ॥५४॥

रुचिर्वररुचिर्वन्द्यो वाचस्पतिरहर्पतिः ।
रविर्विरोचनः स्कन्दः शास्ता वैवस्वतोऽर्जुनः ॥५५॥

मुक्तिरुन्नतकीर्तिश्च शान्तरामः पुरंजयः ।
कैलासपतिः कामारिः सविता रविलोचनः ॥५६॥

विद्वत्तमो वीतभयो विश्वकर्माऽनिवारितः ।
नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ॥५७॥

दूरश्रवा विश्वसहो ध्येयो दुःस्वप्ननाशनः ।
उत्तारको दुष्कृतिहा दुर्धर्षो दुःसहोऽभयः ॥५८॥

अनादिर्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः ।
विश्वगोप्ता विश्वहर्ता सुवीरो रुचिराङ्गदी ॥५९॥

जननो जनजन्मादिः प्रीतिमान्नीतिमानथ ।
वसिष्ठः कश्यपो भानुर्भीमो भीमपराक्रमः ॥६०॥

प्रणवः सत्पथाचारो महाकायो महाधनुः ।
जन्माधिपो महादेवः सकलागमपारगः ॥६१॥

तत्त्वं तत्त्वविदेकात्मा विभूतिर्भूतिभूषणः ।
ऋषिर्ब्राह्मणविद्विष्णुर्जन्ममृत्युजरातिगः ॥६२॥

यज्ञो यज्ञपतिर्यज्वा यज्ञान्तोऽमोघविक्रमः ।
महेन्द्रो दुर्भरः सेनी यज्ञाङ्गो यज्ञवाहनः ॥६३॥

पञ्चब्रह्मसमुत्पत्तिर्विश्वतो विमलोदयः ।
आत्मयोनिरनाद्यन्तः षड्विंशो लोकभृत्कविः ॥६४॥

गायत्रीवल्लभः प्रांशुर्विश्वावासः सदाशिवः ।
शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा ॥६५॥

अमेयोऽरिष्टमथनो मुकुन्दो विगतज्वरः ।
स्वयंज्योतिरनुज्योतिरचलः परमेश्वरः ॥६६॥

पिङ्गलः कपिलश्मश्रुः शास्त्रनेत्रस्त्रयीतनुः ।
ज्ञानस्कन्धो महाज्ञानी वीरोत्पत्तिरुपप्लवी ॥६७॥

भगो विवस्वानादित्यो योगाचारो दिवस्पतिः ।
उदारकीर्तिरुद्योगी सद्योगी सदसन्मयः ॥६८॥

नक्षत्रमाली नाकेशः स्वाधिष्ठानषडाश्रयः ।
पवित्रपादः पापारिर्मणिपूरो नभोगतिः ॥६९॥

हृत्पुण्डरीकमासीनः शुक्रांशानो वृषाकपिः ।
तुष्टो गृहपतिः कृष्णः समर्थोऽनर्थशासनः ॥७०॥

अधर्मशत्रुरक्षय्यः पुरूहूतः पुरुष्टुतः ।
बृहद्भुजो ब्रह्मगर्भो धर्मधेनुर्धनागमः ॥७१॥

जगद्धितैषी सुगतः कुमारः कुशलागमः ।
हिरण्यगर्भो ज्योतिष्मानुपेन्द्रस्तिमिरापहः ॥७२॥

अरोगस्तपनाध्यक्षो विश्वामित्रो द्विजेश्वरः ।
ब्रह्मज्योतिः सुबुद्धात्मा बृहज्ज्योतिरनुत्तमः ॥७३॥

मातामहो मातरिश्वा मनस्वी नागहारधृक् ।
पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः ॥७४॥

निरावरणविज्ञानो विरञ्चो विष्टरश्रवाः ।
आत्मभूरनिरुद्धोऽत्रिर्ज्ञानमूर्तिर्महायशाः ॥७५॥

लोकचूडामणिर्वीरश्चन्द्रः सत्यपराक्रमः ।
व्यालकल्पो महाकल्पः कल्पवृक्षः कलानिधिः ॥७६॥

अलङ्करिष्णुरचलो रोचिष्णुर्विक्रमोत्तमः ।
आशुः सप्तपतिर्वेगी प्लवनः शिखिसारथिः ॥७७॥

असंतुष्टोऽतिथिः शुक्रः प्रमाथी पापशासनः ।
वसुश्रवा कव्यवाहः प्रतप्तो विश्वभोजनः ॥७८॥

जयो जरारिशमनो लोहिताश्वस्तनूनपात् ।
पृषदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा ॥७९॥

निदाघस्तपनो मेघः पक्षः परपुरंजयः ।
सुखी नीलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ॥८०॥

वसन्तो माधवो ग्रीष्मो नभस्यो बीजवाहनः ।
मनो बुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः ॥८१॥

जमदग्निर्जलनिधिर्विपाको विश्वकारकः ।
अधरोऽनुत्तरो ज्ञेयो ज्येष्ठो निःश्रेयसालयः ॥८२॥

शैलो नाम तरुर्दाहो दानवारिररिंदमः ।
चामुण्डी जनकश्चारुर्निःशल्यो लोकशल्यहृत् ॥८३॥

चतुर्वेदश्चतुर्भावश्चतुरश्चत्वरप्रियः ।
आम्नायोऽथ समाम्नायस्तीर्थदेवः शिवालयः ॥८४॥

वज्ररूपो महादेवः सर्वरूपश्चराचरः ।
न्यायनिर्वाहको न्यायो न्यायगम्यो निरञ्जनः ॥८५॥

सहस्रमूर्धा देवेन्द्रः सर्वशस्त्रप्रभञ्जनः ।
मुण्डो विरूपो विकृतो दण्डी दान्तो गुणोत्तरः ॥८६॥

पिङ्गलाक्षोऽथ हर्यक्षो नीलग्रीवो निरामयः ।
सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकधृक् ॥८७॥

पद्मासनः परंज्योतिः परावरः परं फलम् ।
पद्मगर्भो महागर्भो विश्वगर्भो विलक्षणः ॥८८॥

यज्ञभुग्वरदो देवो वरेशश्च महास्वनः ।
देवासुरगुरुर्देवः शंकरो लोकसंभवः ॥८९॥

सर्ववेदमयोऽचिन्त्यो देवतासत्यसंभवः ।
देवाधिदेवो देवर्षिर्देवासुरवरप्रदः ॥९०॥

देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः ।
देवासुराणां वरदो देवासुरनमस्कृतः ॥९१॥

देवासुरमहामात्रो देवासुरमहाश्रयः ।
सर्वदिवमयोऽचिन्त्यो देवानामात्मसंभवः ॥९२॥

ईड्योऽनीशः सुरव्याघ्रो देवसिंहो दिवाकरः ।
विबुधाग्रवरः श्रेष्ठः सर्वदेवोत्तमोत्तमः ॥९३॥

शिवध्यानरतः श्रीमाञ्शिखी श्रीपर्वतप्रियः ।
वज्रहस्तः प्रतिष्टम्भी विश्वज्ञानी निशाकरः ॥९४॥

ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ।
नन्दी नन्दीश्वरो नग्नो नग्नव्रतधरः शुचिः ॥९५॥

लिङ्गाध्यक्षः सुराध्यक्षो धर्माध्यक्षो युगावहः ।
स्ववशः स्वर्गतः स्वर्गः सर्गः स्वरमयः स्वनः ॥९६॥

बीजाध्यक्षो बीजकर्ता धर्मकृद्धर्मवर्धनः ।
दम्भोऽदम्भो महादम्भः सर्वभूतमहेश्वरः ॥९७॥

श्मशाननिलयस्तिष्यः सेतुरप्रतिमाकृतिः ।
लोकोत्तरः स्फुटालोकस्त्रयम्बको भक्तवत्सलः ॥९८॥

अन्धकारिर्मखद्वेषी विष्णुकन्धरपातनः ।
वीतदोषोऽक्षयगुणोऽन्तकारिः पूषदन्तभित् ॥९९॥

धूर्जटिः खण्डपरशुः सकलो निष्कलोऽनघः ।
आकारः सकलाधारः पाण्डुरागो मृगो नटः ॥१००॥

पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ।
सामगेयः प्रियः क्रूरः पुण्यकीर्तिरनामयः ॥१०१॥

मनोजवस्तीर्थकरो जटिलो जीवितेश्वरः ।
जीवितान्तकरोऽनन्तो वसुरेता वसुप्रदः ॥१०२॥

सद्गतिः सत्कृतिः शान्तः कालकण्ठः कलाधरः ।
मानी मन्तुर्महाकालः सद्भूतिः सत्परायणः ॥१०३॥

चन्द्रसंजीवनः शास्ता लोकरूढो महाधिपः ।
लोकबन्धुर्लोकनाथः कृतज्ञः कृतभूषणः ॥१०४॥

अनपायोऽक्षरः क्षान्तः सर्वशस्त्रभृतां वरः ।
तेजोमयो द्युतिधरो लोकमायोऽग्रणीरणुः ॥१०५॥

सुविस्मितः प्रसन्नात्मा दुर्जयो दुरतिक्रमः ।
ज्योतिर्मयो निराकारो जगन्नाथो जलेश्वरः ॥१०६॥

तुम्बी वीणा महाशोको विशोकः शोकनाशनः ।
त्रिलोकेशस्त्रिलोकात्मा सिद्धिः शुद्धिरधोक्षजः ॥१०७॥

अव्यक्तलक्षणो व्यक्तो व्यक्ताव्यक्तो विशांपतिः ।
वरशीलो वरगुणो गतो गव्ययनो मयः ॥१०८॥

ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्मतः ।
वेधा विधाता स्रष्टा च कर्ता हर्ता चतुर्मुखः ॥१०९॥

कैलासशिखरावासी सर्वावासी सदागतिः ।
हिरण्यगर्भो गगनः पुरुषः पूर्वजः पिता ॥११०॥

भूतालयो भूतपतिर्भूतिदो भुवनेश्वरः ।
संयमो योगविद्भ्रष्टो ब्रह्मण्यो ब्राह्मणप्रियः ॥१११॥

देवप्रियो देवनाथो दैवज्ञो देवचिन्तकः ।
विषमाक्षो विशालाक्षो वृषदो वृषवर्धनः ॥११२॥

निर्ममो निरहंकारो निर्मोहो निरुपप्लवः ।
दर्पहा दर्पणो दृप्तः सर्वर्तुपरिवर्तकः ॥११३॥

सप्तजिह्वः सहस्रार्चिः स्निग्धः प्रकृतिदक्षिणः ।
भूतभव्यभवन्नाथः प्रभवो भ्रान्तिनाशनः ॥११४॥

अर्थोऽनर्थो महाकोशः परकार्येकपण्डितः ।
निष्कण्टकः कृतानन्दो निर्व्याजो व्याजदर्शनः ॥११५॥

सत्त्ववान्सात्त्विकः सत्यः कीर्तिस्तम्भः कृतागमः ।
अकार्पितो गुणग्राही नैकात्मा लोककर्मकृत् ॥११६॥

श्रीवल्लभः शिवारम्भः शान्तभद्रः समञ्जसः ।
भूशयो भूतिकृद्भूतिर्विभूतिर्भूतिवाहनः ॥११७॥

अकायो भूतकायस्थः कालज्ञानो महापटुः ।
सत्यव्रतो महात्याग इच्छाशान्तिपरायणः ॥११८॥

परार्थवृत्तिवरदो विविक्तः श्रुतिसागरः ।
अनिर्विण्णो गुणग्राही निष्कलङ्कः कलङ्कहा ॥११९॥

स्वभावभद्रो मध्यस्थः शत्रुघ्नः शत्रुनाशनः ।
शिखण्डी कवची शूली जटी मुण्डी च कुण्डली ॥१२०॥

मेखली कञ्चुकी खड्गी माली संसारसारथिः ।
अमृत्युः सर्वजित्सिंहस्तेजोराशिर्महामणिः ॥१२१॥

असंख्येयोऽप्रमेयात्मा वीर्यवान्कार्यकोविदः ।
वेद्यो वैद्यो वियद्गोप्ता सप्तावरमुनीश्वरः ॥१२२॥

अनुत्तमो दुराधर्षो मधुरः प्रियदर्शनः ।
सुरेशः शरणं शर्म सर्वः शब्दवतां गतिः ॥१२३॥

कालः पक्षः करङ्कारिः कङ्कणीकृतवासुकिः ।
महेष्वासो महीभर्ता निष्कलङ्को विशृङ्खलः ॥१२४॥

द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः ।
विवृतः संवृतः शिल्पी व्यूढोरस्को महाभुजः ॥१२५॥

एकज्योतिर्निरातङ्को नरनारायणप्रियः ।
निर्लेपो निष्प्रपञ्चात्मा निर्व्यग्रो व्यग्रनाशनः ॥१२६॥

स्तव्यः स्तवप्रियः स्तोता व्योममूर्तिरनाकुलः ।
निरवद्यपदोपायो विद्याराशिरकृत्रिमः ॥१२७॥

प्रशान्तबुद्धिरक्षुद्रः क्षुद्रहा नित्यसुन्दरः ।
ध्येयोऽग्रधुर्यो धात्रीशः साकल्यः शर्वरीपतिः ॥१२८॥

परमार्थगुरुर्व्यापी शुचिराश्रितवत्सलः ।
रसो रसज्ञः सारज्ञः सर्वसत्त्वावलम्बनः ॥१२९॥

एवं नाम्नां सहस्रेण तुष्टाव गिरिजापतिम् ।
संपूज्य परया भक्त्या पुण्डरीकैर्द्विजोत्तमाः ॥१३०॥

जिज्ञासार्थं हरेर्भक्त्या कमलेषु शिवः स्वयम् ।
तत्रैकं गोपयामास कमलं मुनिपुङ्गवाः ॥१३१॥

हृते पुष्पे तदा विष्णुश्चिन्तयन्किमिदं त्विति ।
ज्ञात्वाऽऽत्मनोऽक्षिमुद्धृत्य पूजयामास शंकरम् ॥१३२॥

अथ ज्ञात्वा महादेवो हरेर्भक्तिं सुनिश्चलाम् ।
प्रादूर्भूतो महादेवो मण्डलात्तिग्मदीधितेः ॥१३३॥

सूर्यकोटिप्रतीकाशस्त्रिनेत्रश्चन्द्रेशेखरः ।
शूलटङ्कगदाचक्रकुन्तपाशधरो विभुः ॥१३४॥

वरदाभयपाणिश्च सर्वाभरणभूषितः ।
तं दृष्ट्वा देवदेवेशं भगवान्कमलेक्षणः ॥१३५॥

पुनर्ननाम चरणौ दण्डवच्छूलपाणिनः ।
दृष्ट्वा शंभुं तदा देवा दुद्रुवुर्भयविह्वलाः ॥१३६॥

चचाल ब्रह्मभुवनं चकम्पे च वसुंधरा ।
अधश्चोर्ध्वं ततः प्रीते ददाह शतयोजनम् ॥१३७॥

शंभोर्भगवतस्तेजस्तदृष्ट्वा प्रहसञ्शिवः ।
अब्रवीच्छार्ङ्गिणं विप्राः कृताञ्जलिपुटं स्थितम् ॥१३८॥

देवकार्यमिदं ज्ञातमिदानीं मधुसूदन ।
दिव्यं ददामि ते चक्रमद्भुतं तत्सुदर्शनम् ॥१३९॥

हितार्थं सर्वदिवानां निर्मितं यन्मया पुरा ।
गृहीत्वा तद्गुणैर्दैत्याञ्जहि विष्णो ममाऽऽज्ञया ॥१४०॥

एवमुक्त्वा ददौ चक्रं सूर्यायुतसमप्रभम् ।
लोकेषु पुण्डरीकाक्ष इति ख्यातिं गतो हरिः ॥१४१॥

पुनस्तमब्रवीच्छंभुर्नारायणमनामयम् ।
वरानन्यान्सुरश्रेष्ठ वरयस्व यथोप्सितान् ॥१४२॥

एवं शंभोर्निगदितं श्रुत्वा देवो जनार्दनः ।
अब्रवीत्खण्डपरशुं प्राञ्जलिः प्रणयान्वितः ॥१४३॥

■

९ श्रीशिवसहस्रनामस्तोत्रम्

श्रीविष्णुरुवाच ॥

भवः शिवो हरो रुद्रः पुरुषः पद्मलोचनः ॥१॥

अर्थितव्यः सदाचारः सर्वशंभुर्महेश्वरः ।
ईश्वरः स्थाणुरीशानः सहस्राक्षः सहस्रपात् ॥२॥

वरीयान् वरदो वंद्यः शंकरः परमेश्वरः ।
गंगाधरः शूलधरः परार्थैकप्रयोजनः ॥३॥

सर्वज्ञः सर्वदेवादिगिरिधन्वा जटाधरः ।
चंद्रापीडश्चंद्रमौलिविद्वान्विश्वामरेश्वरः ॥४॥

वेदांतसारसंदोहः कपाली नीललोहितः ।
ध्यानाधारोपरिच्छेद्यो गौरीभर्ता गणेश्वरः ॥५॥

अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गः स्वर्गसाधनः ।
ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः ॥६॥

वामदेवो महादेवः पांडुः परिदृढो दृढः ।
विश्वरूपो विरूपाक्षो वागीशः सुचिरंतरः ॥७॥

सर्वप्रणयसंवादीवृषांको वृषवाहनः ।
ईशः पिनाकी खट्वांगी चित्रवेषश्चिरंतनः ॥८॥

तमोहरो महा योगी गोप्ता ब्रह्मांगत्हज्जटी ।
कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः ॥९॥

उन्मत्तवेषश्चक्षुष्यो दुर्वासाः स्मरशासनः ।
दृढायुधः स्कंदगुरुः परमेष्ठी परायणः ॥१०॥

अनादिमध्यनिधनो गिरिशो गिरिबांधवः ।
कुबेरबंधुः श्रीकंठो लोकवर्णोत्तमोत्तमः ॥११॥

सामान्यदेवः कोदंडी नीलकंठः परश्वधी ।
विशालाक्षो मृगव्याधः सुरेशः सूर्यतापनः ॥१२॥

धर्मकर्माक्षमः क्षेत्रं भगवान् भगनेत्रभित् ।
उग्रः पशुपतिस्ताक्ष्र्यप्रियभक्तः प्रियंवदः ॥१३॥

दांतो दयाकरो दक्षः कपर्दी कामशासनः ।
श्मशाननिलयः सूक्ष्मः श्मशानस्थो महेश्वरः ॥१४॥

लोककर्ता भूतपतिः महाकर्ता महौषधी ।
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥१५॥

नीतिः सुनीतिः शुद्धात्मा सोमसोमरतः सखी ।
सोमपोमृतपः सोमो महानीतिर्महामतिः ॥१६॥

अजातशत्रुरालोकः संभाव्यो हव्यवाहनः ।
लोककारो वेदकारः सूत्रकारः सनातनः ॥१७॥

महर्षिः कपिलाचार्यो विश्वदीप्तिस्त्रिलोचनः ।
पिनाकपाणिभूर्देवः स्वस्तिदः स्वस्तिकृत्सदा ॥१८॥

त्रिधामा सौभगः शर्वः सर्वज्ञः सर्वगोचरः ।
ब्रह्मधृग्विश्वसृक्स्वर्गः कर्णिकारः प्रियः कविः ॥१९॥

शाखो विशाखो गोशाखः शिवोनेकः ऋतुः समः ।
गंगाप्लवोदको भावः सकलस्थपतिस्थिरः ॥२०॥

विजितात्मा विधेयात्मा भूतवाहनसारथिः ।
सगणो गणकार्यश्च सुकीर्तिश्छिन्नसंशयः ॥२१॥

कामदेवः कामपालो भस्मोद्धूलितविग्रहः ।
भस्मप्रियो भस्मशायी कामी कांतः कृतागमः ॥२२॥

समायुक्तो निवृत्तात्मा धर्मयुक्तः सदाशिवः ।
चतुर्मुखश्चतुर्बाहुर्दुरावासो दुरासदः ॥२३॥

दुर्गमो दुर्लभो दुर्गः सर्वायुधविशारदः ।
अध्यात्मयोगनिलयः सुतंतुस्तंतुवर्धनः ॥२४॥

शुभांगो लोकसारंगो जगदीशोऽमृताशनः ।
भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः ॥२५॥

हिरण्यरेतास्तरणिर्मरीचिर्महिमालयः ।
महाह्रदो महागर्भः सिद्धवृंदारवंदितः ॥२६॥

व्याघ्रचर्मधरो व्याली महाभूतो महानिधिः ।
अमृतांगोऽमृतवपुः पंचयज्ञः प्रभंजनः ॥२७॥

पंचविंशतितत्त्वज्ञः पारिजातः परावरः ।
सुलभः सुव्रतः शूरो वाङ्मयैकनिधिर्निधिः ॥२८॥

वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः ।
आश्रमः क्षपणः क्षामो ज्ञानवानचलाचलः ॥२९॥

प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः ।
धनुर्धरो धनुर्वेदो गुणराशिर्गुणाकरः ॥३०॥

अनंतदृष्टिरानंदो दंडो दमयिता दमः ।
अभिवाद्यो महाचार्यो विश्वकर्मा विशारदः ॥३१॥

वीतरागो विनीतात्मा तपस्वी भूतभावनः ।
उन्मत्तवेषः प्रच्छन्नो जितकामो जितप्रियः ॥३२॥

कल्याणप्रकृतिः कल्पः सर्वलोकप्रजापतिः ।
तपस्वी तारको धीमान् प्रधानप्रभुरव्ययः ॥३३॥

लोकपालोंतर्हितात्मा कल्पादिः कमलेक्षणः ।
वेदशास्त्रार्थतत्त्वज्ञो नियमो नियमाश्रयः ॥३४॥

चंद्रः सूर्यः शनिः केतुर्विरामो विद्रुमच्छविः ।
भक्तिगम्यः परं ब्रह्म मृगबाणार्पणोनघः ॥३५॥

अद्रिराजालयः कांतः परमात्मा जगद्गुरुः ।
सर्वकर्माचलस्त्वष्टा मंगल्यो मंगलावृतः ॥३६॥

महातपा दीर्घतपाः स्थविष्टः स्थविरो ध्रुवः ।
अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥३७॥

संवत्सरकरो मंत्रः प्रत्ययः सर्वदर्शनः ।
अजः सर्वेश्वरः स्निग्धो महारेता महाबलः ॥३८॥

योगी योग्यो महारेताः सिद्धः सर्वादिरग्निदः ।
वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ॥३९॥

अमृतः शाश्वतः शांतो बाणहस्तः प्रतापवान् ।
कमंडलुधरो धन्वी वेदांगो वेदविन्मुनिः ॥४०॥

भ्राजिष्णुर्भोजनं भोक्ता लोकनेता दुराधरः ।
अतींद्रियो महामायः सर्वावासश्चतुष्पथः ॥४१॥

कालयोगी महानादो महोत्साहो महाबलः ।
महाबुद्धिर्महावीर्यो भूतचारी पुरंदरः ॥४२॥

निशाचरः प्रेतचारिमहाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमान्सर्वहार्यमितो गतिः ॥४३॥

बहुश्रुतो बहुमयो नियतात्मा भवोद्भवः ।
ओजस्तेजो द्युतिकरो नर्तकः सर्वकामकः ॥४४॥

नृत्यप्रियो नृत्यनृत्यः प्रकाशात्मा प्रतापनः ।
बुद्धः स्पष्टाक्षरो मंत्रः सन्मानः सारसं प्लवः ॥४५॥

युगादिकृद्युगावर्तो गंभीरो वृषवाहनः ।
इष्टो विशिष्टः शिष्टेष्टः शरभः शरभो धनुः ॥४६॥

अपां निधिरधिष्ठानं विजयो जयकालवित् ।
प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥४७॥

विरोचनः सुरगणो विद्येशो विबुधाश्रयः ।
बालरूपो वलोन्माथी विवर्तो गहनो गुरुः ॥४८॥

करणं कारणं कर्ता सर्वबंधविमोचनः ।
विद्वत्तमो वीतभयो विश्वभर्ता निशाकरः ॥४९॥

व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ।
दुंदुभो ललितो विश्वो भवात्मात्मनिसंस्थितः ॥५०॥

वीरेश्वरो वीरभद्रो वीरहा वीरभृद्विराट् ।
वीरचूडामणिर्वेत्ता तीव्रनादो नदीधरः ॥५१॥

आज्ञाधारस्त्रिशूली च शिपिविष्टः शिवालयः ।
वालखिल्यो महाचापस्तिग्मांशुर्निधिरव्ययः ॥५२॥

अभिरामः सुशरणः सुब्रह्मण्यः सुधापतिः ।
मघवान्कौशिको गोमान् विश्रामः सर्वशासनः ॥५३॥

ललाटाक्षो विश्वदेहः सारः संसारचक्रभृत् ।
अमोघदंडी मध्यस्थो हिरण्यो ब्रह्मवर्चसी ॥५४॥

परमार्थः परमयः शंबरो व्याघ्रकोनलः ।
रुचिर्वररुचिर्वंद्यो वाचस्पतिरहर्पतिः ॥५५॥

रविर्विरोचनः स्कंधः शास्ता वैवस्वतो जनः ।
युक्तिरुन्नतकीर्तिश्च शांतरागः पराजयः ॥५६॥

कैलासपतिकामारिः सविता रविलोचनः ।
विद्वत्तमो वीतभयो विश्वहर्ता निवारितः ॥५७॥

नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ।
दूरश्रवा विश्वसहो ध्येयो दुःस्वप्ननाशनः ॥५८॥

उत्तारको दुष्कृतिहा दुर्धर्षो दुःसहोभयः ।
अनादिर्भूर्भुवो लक्ष्मीः किरीटित्रिदशाधिपः ॥५९॥

विश्वगोप्ता विश्वभर्ता सुधीरो रुचिरांगदः ।
जननो जनजन्मादिः प्रीतिमान्नितिमान्नयः ॥६०॥

विशिष्टः काश्यपो भानुर्भीमो भीमपराक्रमः ।
प्रणवः सप्तधाचारो महाकायो महाधनुः ॥६१॥

जन्माधिपो महादेवः सकलागमपारगः ।
तत्त्वातत्त्वविवेकात्मा विभूष्णुर्भूतिभूषणः ॥६२॥

ऋषिर्ब्राह्मणविज्जिष्णुर्जन्ममृत्युजरातिगः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञांतो मोधविक्रमः ॥६३॥

महेंद्रो दुर्भरः सेनी यज्ञांगो यज्ञवाहनः ।
पंचब्रह्मसमुत्पत्तिर्विश्वेशो विमलोदयः ॥६४॥

आत्मयोनिरनाद्यंतो षड्विंशत्सप्तलोकधृक् ।
गायत्री वल्लभः प्रांशुर्विश्वावासः प्रभाकरः ॥६५॥

शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा ।
अमोधोरिष्टमथनो सुकुंमुदो विगतज्वरः ॥६६॥

स्वयंज्योतिरनुज्योतिरात्मज्योतिरचंचलः ।
पिंगलः कपिलश्मश्रुः शास्त्रनेत्रस्त्रयीतनुः ॥६७॥

ज्ञानस्कंधो महाज्ञानी निरुत्पत्तिरुपप्लवः ।
भगो विवस्वानादित्यो योगाचार्यो बृहस्पतिः ॥६८॥

उदारकीर्तिरुद्योगी सद्योगीसदसन्मयः ।
नक्षत्रमाली राकेशः साधिष्ठानः षडाश्रयः ॥६९॥

पवित्रपाणिः पापारिर्मणिपूरो मनोगतिः ।
हृत्पुंडरीकमासीनः शुक्लः शांतो वृषाकपिः ॥७०॥

विष्णुर्ग्रहपतिः कृष्णः समर्थोऽनर्थनाशनः ।
अधर्मशत्रुरक्षय्यः पुरुहूतः पुरुष्टुतः ॥७१॥

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः ।
जगद्धितैषिसुगतः कुमारः कुशलागमः ।।७२।।

हिरण्यवर्णो ज्योतिष्मान्नानाभूतधरो ध्वनिः ।
अरोगो नियमाध्यक्षो विश्वामित्रो द्विजोतमः ।।७३।।

बृहज्योतिः सुधामा च महाज्योतिरनुत्तमः ।
मातामहो मातरिश्वा नभस्वान्नागहारधृक् ।।७४।।

पुलस्त्यः पुलहोगस्त्यो जातूकर्ण्यः पराशरः ।
निरावरणधर्मज्ञो विरिंचो विष्टरश्रवाः ।।७५।।

आत्मभूरनिरुद्धो त्रिज्ञानमूर्तिर्महायशाः ।
लोकचूडामणिर्वीरः चंडसत्यपराक्रमः ।।७६।।

व्यालकल्पो महाकल्पो महाबृक्षः कलाधरः ।
अलंकरिष्णुस्त्वचलो रोचिष्णुर्विक्रमोत्तमः ।।७७।।

आशुशब्दपतिर्वेगी प्लवनः शिखिसारथिः ।
असंसृष्टोऽतिथिः शक्रः प्रमाथी पापनाशनः ।।७८।।

वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः ।
जर्यो जराधिशमनो लोहितश्च तनूनपात् ।।७९।।

पृपदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा ।
निदाघस्तपनो मेधः पक्षः परपुरंजयः ।।८०।।

मुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ।
वसंतो माधवो ग्रीष्मो नभस्यो बीजवाहनः ।।८१।।

अंगिरामुनिरात्रेयो विमलो विश्ववाहनः ।
पावनः पुरुजिच्छक्रस्त्रिविद्यो नरवाहनः ।।८२।।

मनो बुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः ।
तेजोनिधिर्ज्ञाननिधिर्विपाको विघ्नकारकः ।।८३।।

अधरोऽनुत्तरोज्ञेयो ज्येष्ठो निःश्रेयसालयः ।
शैलो नगस्तनुर्दोहो दानवारिररिंदमः ॥८४॥

चारुधीर्जनकश्चारु विशल्यो लोकशल्यकृत् ।
चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः ॥८५॥

आम्नायोथ समाम्नायस्तीर्थदेवशिवालयः ।
बहुरूपो महारूपः सर्वरूपश्चराचरः ॥८६॥

न्यायनिर्वाहको न्यायो न्यायगम्यो निरंजनः ।
सहस्रमूर्धा देवेंद्रः सर्वशस्त्रप्रभंजनः ॥८७॥

मुंडो विरूपो विकृतो दंडी दांतो गुणोत्तमः ।
पिंगलाक्षोथ हर्यक्षो नीलग्रीवो निरामयः ॥८८॥

सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकभृत् ।
पद्मासनः परंज्योतिः परावरपरंफलः ॥८९॥

पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ।
परावरज्ञो बीजेशः सुमुखः सुमहास्वनः ॥९०॥

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुरमहाश्रयः ॥९१॥

देवादिदेवो देवर्षिर्देवासुरवरप्रदः ।
देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः ॥९२॥

सर्वदेवमयोचिंत्यो देवतात्मात्मसंभवः ।
ईड्योनीशः सुव्याघ्रो देवसिंहो दिवाकरः ॥९३॥

विबुधाग्रवरश्रेष्ठः सर्वदेवोत्तमोत्तमः ।
शिवज्ञानरतः श्रीमान् शिखिश्रीपर्वतप्रियः ॥९४॥

जयस्तंभो विशिष्टंभो नरसिंहनिपातनः ।
ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ॥९५॥

नंदी नंदीश्वरो नग्नो नग्नव्रतधरः शुचिः ।
लिंगाध्यक्षः सुराध्यक्षो युगाध्यक्षो युगावहः ॥९६॥

स्ववशः सवशः स्वर्गः स्वरः स्वरमयः स्वनः ।
बीजाध्यक्षो बीजकर्ता धनकृद्धर्मवर्धनः ॥९७॥

दंभोऽदंभो महादंभः सर्वभूतमहेश्वरः ।
श्मशाननिलयस्तिष्यः सेतुरप्रतिमाकृतिः ॥९८॥

लोकोत्तरस्फुटालोकस्त्र्यंबको नागभूषणः ।
अंधकारिर्मखद्वेषी विष्णुकंधरपातनः ॥९९॥

वीतदोषोऽक्षयगुणो दक्षारिः पूषदंतहृत् ।
धूर्जटिः खंडपरशुः सकलो निष्कलोनघः ॥१००॥

आधारः सकलाधारः पांडुराभो मृडो नटः ।
पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ॥१०१॥

सामगेयः प्रियकरः पुण्यकीर्तिरनामयः ।
मनोजवस्तीर्थकरो जटिलो जीवितेश्वरः ॥१०२॥

जीवितांतकरो नित्यो वसुरेता वसुप्रियः ।
सद्गतिः सत्कृतिः सक्तः कालकंठः कलाधरः ॥१०३॥

मानी मान्यो महाकालः सद्भूतिः सत्परायणः ।
चंद्रसंजीवनः शास्ता लोकगूढोमराधिपः ॥१०४॥

लोकबंधूर्लोकनाथः कृतज्ञः कृतिभूषणः ।
अनपाय्यक्षरः कांतः सर्वशास्त्रभृतां वरः ॥१०५॥

तेजोमयो द्युतिधरो लोकमायोग्रणीरणुः ।
शुचिस्मितः प्रसन्नात्मा दुर्जयो दुरतिक्रमः ॥१०६॥

ज्योतिर्मयो निराकारो जगन्नाथो जलेश्वरः ।
तंबवीणी महाकायो विशोकः शोकनाशनः ॥१०७॥

त्रिलोकात्मा त्रिलोकेशः शुद्धः शुद्धिरथाक्षजः ।
अव्यक्तलक्षणो व्यक्तो व्यक्ताव्यक्तो विशांपतिः ॥१०८॥

वरशीलो वरतुलो मानो मानधनोमयः ।
ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्यमः ॥१०९॥

वेधा धाता विधाता च अत्ता हर्ता चतुर्मुखः ।
कैलासशिखरावासी सर्वावासी सतां गतिः ॥११०॥

हिरण्यगर्भो हरिणः पुरुषः पूर्वजः पिता ।
भूतालयो भूतपतिर्भूतिदो भुवनेश्वरः ॥१११॥

संयोगी योगविद्ब्रह्मा ब्रह्मण्यो ब्राह्मणप्रियः ।
देवप्रियो देवनाथो देवज्ञो देवचिंतकः ॥११२॥

विपमाक्षः कलाध्यक्षो वृषांको वृषवर्धनः ।
निर्मदो निरहंकारो निर्मोहो निरुपद्रवः ॥११३॥

दर्पहा दर्पितो दृप्तः सर्वर्तुपरिवर्तकः ।
सप्तजिह्वः सहस्रार्चिः स्निग्धः प्रकृतिदक्षिणः ॥११४॥

भूतभव्यभवन्नाथः प्रभवो भ्रांतिनाशनः ।
अर्थोनर्थो महाकोशः परकार्यैकपंडितः ॥११५॥

निष्कंटकः कृतानंदो निर्व्याजो व्याजमर्दनः ।
सत्त्ववान्सात्त्विकः सत्यकीर्तिस्तंभकृतागमः ॥११६॥

अकंपितो गुणग्राही नैकात्मा नैककर्मकृत् ।
सुप्रीतः सुमुखः सूक्ष्मः सुकरो दक्षिणोनलः ॥११७॥

स्कंधः स्कंधधरो धुर्यः प्रकटः प्रीतिवर्धनः ।
अपराजितः सर्वसहो विदग्धः सर्ववाहनः ॥११८॥

अधृतः स्वधृतः साध्यः पूर्तमूर्तिर्यशोधरः ।
वराहश्रृंगधृग्वायुर्बलवानेकनायकः ॥११९॥

श्रुतिप्रकाशः श्रुतिमानेकबंधुरनेकधृक ।
श्रीवल्लभशिवारंभः शांतभद्रः समंजसः ॥१२०॥

भूशयो भूतिकृद्भूतिर्भूषणो भूतवाहनः ।
अकायो भक्तकायस्थः कालज्ञानी कलावपुः ॥१२१॥

सत्यव्रतमहात्यागी निष्ठाशांतिपरायणः ।
परार्थवृत्तिर्वरदो विविक्तः श्रुतिसागरः ॥१२२॥

अनिर्विण्णो गुणग्राही कलंकांकः कलंकहा ।
स्वभावरुद्रो मध्यस्थः शत्रुघ्नो मध्यनाशकः ॥१२३॥

शिखंडी कवची शूली चंडी मुंडी च कुंडली ।
मेखली कवची खड्गी मायी संसारसारथि ॥१२४॥

अमृत्युः सर्वदृक् सिंहस्तेजोराशिर्महामणिः ।
असंख्येयोप्रमेयात्मावीर्यवान्कार्यकोविदः ॥१२५॥

वेद्यो वेदार्थविद्गोप्ता सर्वाचारो मुनीश्वरः ।
अनुत्तमो दुराधर्षो मधुरः प्रियदर्शनः ॥१२६॥

सुरेशः शरणं सर्वः शब्दब्रह्मसतांगतिः ।
कालभक्षः कलंकारीः कंकणीकृतवासुकिः ॥१२७॥

महेष्वासो महीभर्ता निष्कलंको विश्रृंखलः ।
द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः ॥१२८॥

निवृत्तः संवृतः शिल्पो व्यूढोरस्को महाभुजः ।
एकज्योतिर्निरातंको नरो नारायणप्रियः ॥१२९॥

निर्लेपो निष्प्रपंचात्मा निर्व्यग्रो व्यग्रनाशनः ।
स्तव्यस्तवप्रियः स्तोता व्यासमूर्तिरनाकुलः ॥१३०॥

निरवद्यपदोपायो विद्याराशिरविक्रमः ।
प्रशांतबुद्धिरक्षुद्रः क्षुद्रहा नित्यसुंदरः ॥१३१॥

धैर्याग्र्यधुर्या धात्रीशः शाकल्यः शर्वरीपतिः ।
परमार्थ गुरुदृष्टिर्गुरुराश्रित वत्सलः ॥१३२॥

रसो रसज्ञः सर्वज्ञः सर्वसत्त्वावलंबनः ।
एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजम् ॥१३३॥

■

१० श्रीशिवसहस्रनामस्तोत्रम्

नमस्ते देवदेवेश देवारिबलसूदन ।
देवेन्द्रबलविष्टम्भ देवदानवपूजित ॥१॥

सहस्राक्ष विरूपाक्ष त्र्यक्ष यक्षाधिपप्रिय ।
सर्वतःप्राणिपादान्त सर्वतोऽक्षिशिरोमुख ॥२॥

सर्वतःश्रुतिमँल्लोके सर्वमावृत्य तिष्ठसि ।
शङ्कुकर्ण महाकर्ण कुम्भकर्णार्णवालय ॥३॥

गजेन्द्रकर्ण गोकर्ण पाणिकर्ण नमोऽस्तु ते ।
शतोदर शतावर्त शतजिह्व नमोऽस्तु ते ॥४॥

गायन्ति त्वा गायत्रिणोऽर्जन्त्यर्कमर्किणः ।
ब्रह्माणं त्वा शतक्रतुमूर्ध्वं खमिव मेनिरे ॥५॥

मूर्तौ हि ते महामूर्ते समुद्राम्बरसंनिभ ।
सर्वा वै देवता ह्यस्मिन् गावो गोष्ठ इवासते ॥६॥

भवच्छरीरे पश्यामि सोममग्निं जलेश्वरम् ।
आदित्यमथ वै विष्णुं ब्रह्माणं च बृहस्पतिम् ॥७॥

भगवान् कारणं कार्यं क्रिया करणमेव च ।
असतश्च सतश्चैव तथैव प्रभवाप्ययौ ॥८॥

नमो भवाय शर्वाय रुद्राय वरदाय च ।
पशूनां पतये नित्यं नमोऽस्त्वन्धकघातिने ॥९॥

त्रिजटाय त्रिशीर्षाय त्रिशूलवरपाणिने ।
त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः ॥१०॥

नमश्चण्डाय कुण्डाय अण्डायाण्डधराय च ।
दण्डिने समकर्णाय दण्डिमुण्डाय वै नमः ॥११॥

नमोर्ध्वदंष्ट्रकेशाय शुक्लायावतताय च ।
विलोहिताय धूम्राय नीलग्रीवाय वै नमः ॥१२॥

नमोऽस्त्वप्रतिरूपाय विरूपाय शिवाय च ।
सूर्याय सूर्यमालाय सूर्यध्वजपताकिने ॥१३॥

नमः प्रमथनाथाय वृषस्कन्धाय धन्विने ।
शत्रुंदमाय दण्डाय पर्णचीरपटाय च ॥१४॥

नमो हिरण्यगर्भाय हिरण्यकवचाय च ।
हिरण्यकृतचूडाय हिरण्यपतये नमः ॥१५॥

नमः स्तुताय स्तुत्याय स्तूयमानाय वै नमः ।
सर्वाय सर्वभक्षाय सर्वभूतान्तरात्मने ॥१६॥

नमो होत्रेऽथ मन्त्राय शुक्लध्वजपताकिने ।
नमो नाभाय नाभ्याय नमः कटकटाय च ॥१७॥

नमोऽस्तु कृशनासाय कृशाङ्गाय कृशाय च ।
संहृष्टाय विहृष्टाय नमः किलकिलाय च ॥१८॥

नमोऽस्तु शयमानाय शयितायोत्थिताय च ।
स्थिताय धावमानाय मुण्डाय जटिलाय च ॥१९॥

नमो नर्तनशीलाय मुखवादित्रवादिने ।
नाद्योपहारलुब्धाय गीतवादित्रशालिने ॥२०॥

नमो ज्येष्ठाय श्रेष्ठाय बलप्रमथनाय च ।
कालनाथाय कल्याय क्षयायोपक्षयाय च ॥२१॥

भीमदुन्दुभिहासाय भीमव्रतधराय च ।
उग्राय च नमो नित्यं नमोऽस्तु दशबाहवे ॥२२॥

नमः कपालहस्ताय चितिभस्मप्रियाय च ।
विभीषणाय भीष्माय भीमव्रतधराय च ॥२३॥

नमो विकृतवक्त्राय खड्गाजिह्वाय दंष्ट्रिणे ।
पक्वाममांसलुब्धाय तुम्बीवीणग्नप्रियाय च ॥२४॥

नमो वृषाय वृष्याय गोवृषाय वृषाय च ।
कटंकटाय दण्डाय नमः पचपचाय च ॥२५॥

नमः सर्ववरिष्ठाय वराय वरदाय च ।
वरमाल्यगन्धवस्त्राय वरातिवरदे नमः ॥२६॥

नमो रक्तविरक्ताय भावनायाक्षमालिने ।
सम्भिन्नाय विभिन्नाय छायायातपनाय च ॥२७॥

अघोरघोररूपाय घोरघोरतराय च ।
नमः शिवाय शान्ताय नमः शान्ततमाय च ॥२८॥

एकपाद्बहुनेत्राय एकशीर्ष्णे नमोऽस्तु ते ।
रुद्राय क्षुद्रलुब्धाय संविभागप्रियाय च ॥२९॥

पञ्चालाय सिताङ्गाय नमः शमशमाय च ।
नमश्चण्डिकघण्टाय घण्टायाघण्टघण्टिने ॥३०॥

सहस्राध्मातघण्टाय घण्टामालाप्रियाय च ।
प्राणघण्टाय गन्धाय नमः कलकलाय च ॥३१॥

हूंहूंहूंकारपाराय हूंहूंकारप्रियाय च ।
नमः शमशमे नित्यं गिरिवृक्षालयाय च ॥३२॥

गर्भमांससृगालाय तारकाय तराय च ।
नमो यज्ञाय यजिने हुताय प्रहुताय च ॥३३॥

यज्ञवाहाय दान्ताय तप्यायातपनाय च ।
नमस्तटाय तट्याय तटानां पतये नमः ॥३४॥

अन्नदायान्नपतये नमस्त्वन्नभुजे तथा ।
नमः सहस्रशीर्षाय सहस्रचरणाय च ॥३५॥

सहस्रोद्यतशूलाय सहस्रनयनाय च ।
नमो बालार्कवर्णाय बालरूपधराय च ॥३६॥

बालानुचरगोप्त्राय बालक्रीडनकाय च ।
नमो वृद्धाय लुब्धाय क्षुब्धाय क्षोमणाय च ॥३७॥

तरङ्गाङ्कितकेशाय मुञ्जकेशाय वै नमः ।
नमः षट्कर्मतुष्टाय त्रिकर्मनिरताय च ॥३८॥

वर्णाश्रमाणां विधिवत् पृथक्कर्मनिवर्तिने ।
नमो धुष्याय घोषाय नमः कलकलाय च ॥३९॥

श्वेतपिङ्गलनेत्राय कृष्णरक्तेक्षणाय च ।
प्राणभग्नाय दण्डाय स्फोटनाय कुशाय च ॥४०॥

धर्मकामार्थमोक्षाणां कथनीयकथाय च ।
सांख्याय सांख्यमुख्याय सांख्ययोगप्रवर्तिने ॥४१॥

नमो रथ्यविरथ्याय चतुष्पथरथाय च ।
कृष्णाजिनोत्तरीयाय व्यालयज्ञोपवीतिने ॥४२॥

ईशान वज्रसंघात हरिकेश नमोऽस्तु ते ।
त्र्यम्बकाम्बिकनाथाय व्यक्ताव्यक्त नमोऽस्तु ते ॥४३॥

काम कामद कामघ्न तृप्तातृप्तविचारिणे ।
सर्व सर्वद सर्वघ्न संध्याराग नमोऽस्तु ते ॥४४॥

महाबल महाबाहो महासत्त्व महाद्युते ।
महामेघचयप्रख्य महाकाल नमोऽस्तु ते ॥४५॥

स्थूल जीर्णाङ्ग जटिले वल्कलाजिनधारिणे ।
दीप्तसूर्याग्निजटिले वल्कलाजिनवाससे ।
सहस्रसूर्यप्रतिम तपोनित्य नमोऽस्तु ते ॥४६॥

उन्मादन शतावर्त गङ्गातोयार्द्रमूर्धज ।
चन्द्रावर्त युगावर्त मेघावर्त नमोऽस्तु ते ॥४७॥

त्वमन्नमन्नभोक्ता च अन्नदोऽन्नभुगेव च ।
अन्नस्रष्टा च पक्ता च पक्वभुक्पवनोऽनलः ॥४८॥

जरायुजाण्डजाश्चैव स्वेदजाश्च तथोद्भिजाः ।
त्वमेव देवदेवेश भूतग्रामश्चतुर्विधः ॥४९॥

चराचरस्य स्रष्टा त्वं प्रतिहर्ता तथैव च ।
त्वामाहुर्ब्रह्मविदुषो ब्रह्म ब्रह्मविदां वर ॥५०॥

मनसः परमा योनिः खं वायुर्ज्योतिषां निधिः ।
ऋक्सामानि तथोङ्कारमाहुस्त्वां ब्रह्मवादिनः ॥५१॥

हायिहायिहुवाहायिहावुहायि तथासकृत् ।
गायन्ति त्वां सुरश्रेष्ठ सामगा ब्रह्मवादिनः ॥५२॥

यजुर्मयो ऋङ्मयश्च त्वमाहुतिमयस्तथा ।
पठ्यसे स्तुतिभिश्चैव वेदोपनिषदां गणैः ॥५३॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णावराश्च ये ।
त्वमेव मेघसंघाश्च विद्युत्स्तनितगर्जितः ॥५४॥

संवत्सरस्त्वमृतवो मासो मासार्धमेव च ।
युगंनिमेषाः काष्ठास्त्वं नक्षत्राणि ग्रहाः कलाः ॥५५॥

वृक्षाणां ककुदोऽसित्वं गिरीणां शिखराणि च ।
व्याघ्रो मृगाणां पततां तार्क्ष्योऽनन्तश्च भोगिनाम् ॥५६॥

क्षीरोदो ह्युदधीनां च यन्त्राणां धनुरेव च ।
वज्रः प्रहरणानां च व्रतानां सत्यमेव च ॥५७॥

त्वमेव द्वेष इच्छा च रागो मोहः क्षमाक्षमे ।
व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ ॥५८॥

त्वं गदी त्वं शरी चापी खट्वाङ्गी झर्झरी तथा ।
छेत्ता भेत्ता प्रहर्ता त्वं नेता मन्ता पिता मतः ॥५९॥

दशलक्षणसंयुक्तो धर्मोऽर्थः काम एव च ।
गङ्गा समुद्राः सरितः पल्वलानि सरांसि च ॥६०॥

लता वल्यस्तृणौषध्यः पशवो मृगपक्षिणः ।
द्रव्यकर्मसमारम्भः कालः पुष्पफलप्रदः ॥६१॥

आदिश्चान्तश्च देवानां गायत्र्योंकार एव च ।
हरितो रोहितो नीलः कृष्णो रक्तस्तथारुणः ।
कद्रुश्च कपिलश्चैव कपोतो मेचकस्तथा ॥६२॥

अवर्णश्च सुवर्णश्च वर्णकारो घनोपमः ।
सुवर्णनामा च तथा सुवर्णप्रिय एव च ॥६३॥

त्वमिन्द्रश्च यमश्चैव वरुणो धनदोऽनलः ।
उपप्लवश्चित्रभानुः स्वर्भानुर्भानुरेव च ॥६४॥

होत्रं होता च होम्यं च हुतं चैव तथा प्रभुः ।
त्रिसौपर्णं तथा ब्रह्म यजुषां शतरुद्रियम् ॥६५॥

पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम् ।
गिरिको हिंडुको वृक्षो जीवः पुद्गल एव च ॥६६॥

प्राणः सत्त्वं रजश्चैव तमश्चाप्रमदस्तथा ।
प्राणोऽपानः समानश्च उदानो व्यान एव च ॥६७॥

उन्मेषश्च निमेषश्च क्षुतं जृम्भितमेव च ।
लोहितान्तर्गता दृष्टिर्महावक्त्रो महोदरः ॥६८॥

सूचीरोमा हरिश्मश्रुरुर्ध्वकेशश्चलाचलः ।
गीतवादित्रतत्त्वज्ञो गीतवादनकप्रियः ॥६९॥

मत्स्यो जलचरोजाल्योऽकलः केलिकलः कलिः ।
अकालश्चातिकालश्च दुष्कालः काल एव च ॥७०॥

मृत्युः क्षुरश्च कृत्यश्च पक्षोऽपक्षक्षयंकरः ।
मेघकालो महादंष्ट्रः संवर्तकबलाहकः ॥७१॥

घण्टोऽघण्टो घटी घण्टी चरुचेली मिलीमिली ।
ब्रह्मकायिकमग्निनां दण्डी मुण्डस्त्रिदण्डधृक् ॥७२॥

चतुर्युगश्चतुर्वेदश्चातुर्होत्रप्रवर्तकः ।
चातुराश्रम्यनेता च चातुर्वर्ण्यकरश्च यः ॥७३॥

सदा चाक्षप्रियो धूर्तो गणाध्यक्षो गणाधिपः ।
रक्तमाल्याम्बरधरो गिरिशो गिरिकप्रियः ॥७४॥

शिल्पिकः शिल्पिनां श्रेष्ठः सर्वशिल्पप्रवर्तकः ।
भगनेत्राङ्कुशश्चण्डः पूष्णो दन्तविनाशनः ॥७५॥

स्वाहा स्वधा वषट्कारो नमस्कारोनमो नमः ।
गूढव्रतो गुह्यतपास्तारकस्तारकामयः ॥७६॥

धाता विधाता संधाता विधाता धारणोऽधरः ।
ब्रह्मा तपश्च सत्यं च ब्रह्मचर्यमथार्जवम् ॥७७॥

भूतात्मा भूतकृद्भूतो भूतभव्यभवोद्भवः ।
भूर्भुवः स्वरितश्चैव ध्रुवो दान्तो महेश्वरः ॥७८॥

दीक्षितोऽदीक्षितः क्षान्तो दुर्दान्तोऽदान्तनाशनः ।
चन्द्रावर्तो युगावर्तः संवर्तः सम्प्रवर्तकः ॥७९॥

कामो बिन्दुरणुः स्थूलः कर्णिकारस्रजप्रियः ।
नन्दीमुखो भीममुखः सुमुखो दुर्मुखोऽमुखः ॥८०॥

चतुर्मुखो बहुमुखो रणेष्वग्निमुखस्तथा ।
हिरण्यगर्भः शकुनिर्महोरगपतिर्विराट् ॥८१॥

अधर्महा महापार्श्वश्चण्डधारो गणाधिपः ।
गोनर्दो गोप्रतारश्च गोवृषेश्वरवाहनः ॥८२॥

त्रैलोक्यगोप्ता गोविन्दो गोमार्गोऽमार्ग एव च ।
श्रेष्ठः स्थिरश्च स्थाणुश्च निष्कम्पः कम्प एव च ॥८३॥

दुर्वारणो दुर्विषहो दुःसहो दुरतिक्रमः ।
दुर्धर्षो दुष्प्रकम्पश्च दुर्विषो दुर्जयो जयः ॥८४॥

शशः शशाङ्कः शमनः शीतोष्णक्षुज्जराधिकृत् ।
आधयो व्याधयश्चैव व्याधिहा व्याधिरेव च ॥८५॥

मम यज्ञमृगव्याधो व्याधीनामागमो गमः ।
शिखण्डी पुण्डरीकाक्षः पुण्डरीकवनालयः ॥८६॥

दण्डधारस्त्र्यम्बकश्च उग्रदण्डोऽण्डनाशनः ।
विषाग्निपाः सुरश्रेष्ठ सोमपास्त्वं मरुत्पतिः ॥८७॥

अमृतपास्त्वं जगन्नाथ देवदेव गणेश्वरः ।

विषाग्निपा मृत्युपाश्च क्षीरपाः सोमपास्तथा ।
मधुश्च्युतानामग्रपास्त्वमेव तुषिताद्यपाः ॥८८॥

हिरण्यरेताः पुरुषस्त्वमेव त्वं स्त्री पुमांस्त्वं च नपुंसकं च ।
बालो युवा स्थविरो जीर्णदंष्ट्रं -
स्त्वं नागेन्द्र शक्रस्त्वं विश्वकृद्विश्वकर्ता ॥८९॥
विश्वकृद् विश्वकृतां वरेण्यस्त्वं विश्ववाहो

विश्वरूपस्तेजस्वी विश्वतोमुखः ।
चन्द्रादित्यौ चक्षुषी ते हृदयं च पितामहः ॥९०॥
महोदधिः सरस्वती वाग् बलमनलोऽ-
निलः अहोरात्रं निमेषोन्मेषकर्म ॥९१॥

न ब्रह्मा न च गोविन्दः पौराणा ऋषयो न ते ।
माहात्म्यं वेदितुं शक्ता याथातथ्येन ते शिव ॥९२॥

या मूर्तयः सुसूक्ष्मास्ते न मह्यं यान्ति दर्शनम् ।
त्राहि मां सततं रक्ष पिता पुत्रमिवौरसम् ॥९३॥

रक्ष मां रक्षणीयोऽहं तवानघ नमोऽस्तु ते ।
भक्तानुकम्पी भगवान् भक्तश्चाहं सदा त्वयि ॥९४॥

यः सहस्राण्यनेकानि पुंसामावृत्य दुर्दृशः ।
तिष्ठत्येकः समुद्रान्ते स मे गोप्तास्तु नित्यशः ॥९५॥

यंविनिद्रा जितश्वासाः सत्त्वस्थाः संयतेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥९६॥

जटिले दण्डिने नित्यं लम्बोदरशरीरिणे ।
कमण्डलुनिषङ्गाय तस्मै ब्रह्मात्मने नमः ॥९७॥

यस्य केशेषु जीमूता नद्यः सर्वाङ्गसंधिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥९८॥

सम्भक्ष्य सर्वभूतानि युगान्ते पर्युपस्थिते ।
यः शेते जलमध्यस्थस्तं प्रपद्येऽम्बुशायिनम् ॥९९॥

प्रविश्य वदनं राहोर्यः सोमं पिबते निशि ।
ग्रसत्यर्कं च स्वर्भानुर्भूत्वा मां सोऽभिरक्षतु ॥१००॥

ये चानुपतिता गर्भा यथा भागानुपासते ।
नमस्तेभ्यः स्वधा स्वाहा प्राप्नुवन्तु मुदन्तु ते ॥१०१॥

येऽङ्गुष्ठमात्राः पुरुषा देहस्थाः सर्वदेहिनाम् ।
रक्षन्तु ते हि मां नित्यं नित्यं चाप्याययन्तु माम् ॥१०२॥

ये न रोदन्ति देहस्था देहिनो रोदयन्ति च ।
हर्षयन्ति न हृष्यन्ति नमस्तेभ्योऽस्तुनित्यशः ॥१०३॥

ये नदीषु समुद्रेषु पर्वतेषु गुहासु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारे गहनेषु च ॥१०४॥

चतुष्पथेषु रथ्यासु चत्वरेषु तटेषु च ।
हस्त्यश्वरथशालासु जीर्णोद्यानालयेषु च ॥१०५॥

येषु पञ्चसु भूतेषु दिशासु विदिशासु च ।
चन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु ॥१०६॥

रसातलगता ये च ये च तस्मै परं गताः ।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्योऽस्तुनित्यशः ॥१०७॥

येषां न विद्यते संख्या प्रमाणं रूपमेव च ।
असंख्येयगुणा रुद्रानमस्तेभ्योऽस्तु नित्यशः ॥१०८॥

■

११ श्रीशिवसहस्रनामस्तोत्रम्

शिवो हरो मृडो रुद्रः पुष्करः पुष्पलोचनः ।
अर्थिगम्यस्सदाचारश्शर्वः शंभुर्महेश्वरः ॥१॥

वेदान्तसारसंदोहः कपाली नीललोहितः ।
चन्द्रापीडश्चन्द्रमौलिर्विश्वं विश्वंभरेश्वरः ॥२॥

ध्यानाधारोऽपरिच्छेद्यो गौरीभर्ता गणेश्वरः ।
अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गस्सर्गसाधनः ॥३॥

ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः ।
वामदेवो महादेवः पटुः परिवृढो दृढः ॥४॥

विश्वरूपो विरूपाक्षो वागीशस्सुरसत्तमः ।
सर्वप्रमाणसंवादी वृषाङ्को वृषवाहनः ॥५॥

ईशः पिनाकी खट्वाङ्गी चित्रवेषश्चिरन्तनः ।
तमोहरो महायोगी गोप्ता ब्रह्माण्डहृज्जटी ॥६॥

कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः ।
उन्नध्रः पुरुषो जुष्या दुर्वासाः पुरशासनः ॥७॥

दिव्यायुधः स्कन्दगुरुः परमेष्ठी परात्परः ।
अनादिमध्यनिधनो गिरीशो गिरिजाधवः ॥८॥

कुबेरबन्धुः श्रीकण्ठो लोकवर्णोत्तमो मृदुः ।
नाधिवेद्यः कोदंडी नीलकण्ठः परश्वधी ॥९॥

विशालाक्षो मृगव्याधः सुरेशस्सूर्यतापनः ।
धर्माध्यक्षः क्षमाक्षेत्रं भगवान् भगनेत्रभित् ॥१०॥

उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः परन्तपः ।
दाता दयाकरो दक्षः कर्मन्दी कामशासनः ॥११॥

श्मशाननिलयस्सूक्ष्मः श्मशानस्थो महेश्वरः ।
लोककर्ता मृगपतिर्महाकर्ता महौषधिः ॥१२॥

सोमपोऽमृतपस्सौम्यो महातेजा महाद्युतिः ।
तेजोमयोऽमृतमयोऽन्नमयश्च सुधापतिः ॥१३॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
नीतिः सुनीतिः शुद्धात्मा सोमस्सोमरतः सुखी ॥१४॥

अजातशत्रुरालोकः संभाव्यो हव्यवाहनः ।
लोककरो वेदकरस्सूत्रकारस्सनातनः ॥१५॥

महर्षिः कपिलाचार्यो विश्वदीप्तिस्त्रिलोचनः ।
पिनाकपाणिभूदिवस्स्वस्तिदस्स्वस्तिकृत्सुधीः ॥१६॥

धातृधामा धामकरस्सर्वगस्सर्वगोचरः ।
ब्रह्मसृग्विश्वसृक् सर्गः कर्णिकारप्रियः कविः ॥१७॥

शाखो विशाखो गोशाखश्शिवो भिषगनुत्तमः ।
गंगाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थिरः ॥१८॥

विजितात्मा विधेयात्मा भूतवाहनसारथिः ।
सगणो गणकायश्च सुकीर्तिश्छिन्नसंशयः ॥१९॥

कामदेवः कामपालो भस्मोद्धूलितविग्रहः ।
भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः ॥२०॥

समावर्त्तोऽनिवृत्तात्मा धर्मपुञ्जः सदाशिवः ।
अकल्मषश्च पुण्यात्मा चतुर्बाहुर्दुरासदः ॥२१॥

दुर्लभो दुर्गमो दुर्गः सर्वायुधविशारदः ।
अध्यात्मयोगनिलयस्सुतन्तुस्तन्तुवर्द्धनः ॥२२॥

शुभाङ्गो लोकसारङ्गो जगदीशो जनार्दनः ।
भस्मशुद्धिकरोऽभीरुरोजस्वी शुद्धविग्रहः ॥२३॥

असाध्यः साधुसाध्यश्च भृत्यमर्कटरूपधृक् ।
हिरण्यरेताः पौराणो रिपुजीवहरो बली ॥२४॥

महाह्रदो महागर्तस्सिद्धवृन्दारवन्दितः ।
व्याघ्रचर्माम्बरो व्याली महाभूतो महानिधिः ॥२५॥

अमृतांशोऽमृतवपुः पाञ्चजन्यः प्रभञ्जनः ।
पञ्चविंशतितत्त्वस्थः पारिजातः परावरः ॥२६॥

सुलभस्सुव्रतश्शूरो ब्रह्मवेदनिधिर्निधिः ।
वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः ॥२७॥

आश्रमः क्षपणः क्षामो ज्ञानवानचलेश्वरः ।
प्रमाणभूतो दुर्ज्ञेयस्सुपर्णो वायुवाहनः ॥२८॥

धनुर्धरो धनुर्वेदो गुणराशिर्गुणाकरः ।
सत्यस्सत्यपरोऽदीनो धर्माङ्गो धर्मसाधनः ॥२९॥
अनन्तदृष्टिरानन्दो दण्डो दमयिता दमः ।
अभिचार्यो महामायो विश्वकर्मा विशारदः ॥३०॥

वीतरागो विनीतात्मा तपस्वी भूतभावनः ।
उन्मत्तवेषः प्रच्छन्नो जितकामोऽजितप्रियः ॥३१॥

कल्याणप्रकृतिः कल्पः सर्वलोकप्रजापति ।
तरस्वी तारको धीमान् प्रधानप्रभुरव्ययः ॥३२॥

लोकपालोऽन्तरात्मा च कल्पादिः कमलेक्षणः ।
वेदशास्त्रार्थतत्त्वज्ञोऽनियमो नियताश्रयः ॥३३॥

चन्द्रः सूर्यः शनिः केतुर्वराङ्गो विद्रुमच्छविः ।
भक्तिवश्यः परब्रह्म मृगवाणार्पणोऽनघः ॥३४॥

अद्रिरद्रयालयः कान्तः परमात्मा जगद्गुरुः ।
सर्वकर्मालयस्तुष्टो माङ्गल्यो मङ्गलावृतः ॥३५॥

महातपा दीर्घतपाः स्थविष्ठः स्थविरो ध्रुवः ।
अहस्संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥३६॥

संवत्सरकरो मन्त्रप्रत्ययः सर्वतापनः ।
अजः सर्वेश्वरस्सिद्धो महातेजा महाबलः ॥३७॥

योगी योग्यो महारेतास्सिद्धिस्सर्वादिरग्रहः ।
वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ॥३८॥

सुकीर्तिः शोभनः स्रग्वी ह्यवाङ्मनसगोचरः ।
अमृतश्शाश्वतः शान्तो बाणहस्तः प्रतापवान् ॥३९॥

कमण्डलुधरो धन्वी वेदाङ्गो वेदविन्मुनिः ।
भ्राजिष्णुर्भोजनं भोक्ता लोकनाथो दुराधरः ॥४०॥

अतीन्द्रियो महामायस्सर्वावासश्चतुष्पथः ।
कालयोगी महानादो महोत्साहो महाबलः ॥४१॥

महाबुद्धिर्महावीर्यो भूतचारी पुरन्दरः ।
निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥४२॥

अनिर्देश्यवपुः श्रीमान् सर्वाचार्यमनोगतिः ।
बहुश्रुतिर्महामायो नियतात्मा ध्रुवोऽध्रुवः ॥४३॥

ओजस्तेजो द्युतिधरो जनकः सर्वशासनः ।
नृत्यप्रियो नित्यनृत्यः प्रकाशात्मा प्रकाशकः ॥४४॥

स्पष्टाक्षरो बुधो मन्त्रस्समानस्सारसंप्लवः ।
युगादिकृद्युगावर्तो गंभीरो वृषवाहनः ॥४५॥

इष्टो विशिष्टश्शिष्टेष्टः शलभः शरभो धनुः ।
तीर्थरूपस्तीर्थनामा तीर्थादृश्यस्स्तुतोऽर्थदः ॥४६॥

अपांनिधिरधिष्ठानं विजयो जयकालवित् ।
प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥४७॥

विमोचनस्सुरगणो विघ्नेशो बिन्दुसंश्रयः ।
बालरूपो बलोन्मत्तो विकर्ता गहनो गुहः ॥४८॥

करणं कारणं कर्ता सर्वबन्धविमोचनः ।
व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ॥४९॥

गुरुदो ललितोऽभेदो भावात्मात्मनि संस्थितः ।
वीरेश्वरो वीरभद्रो वीरासनविधिर्गुरुः ॥५०॥

वीरचूडामणिर्वेत्ता चिदानन्दो नदीधरः ।
आज्ञाधारस्त्रिशूली च शिपिविष्टः शिवालयः ॥५१॥

वालखिल्यो महावीरस्तिग्मांशुर्बधिरः खगः ।
अभिरामस्सुशरणस्सुब्रह्मण्यः सुधापतिः ॥५२॥

मघवान् कौशिको गोमान् विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेहस्सारस्संसारचक्रभृत् ॥५३॥

अमोघदण्डो मध्यस्थो हिरण्यो ब्रह्मवर्चसः ।
परमार्थः परोमायी शंबरो व्याघ्रलोचनः ॥५४॥

रुचिर्विरञ्चिः स्वर्बन्धुर्वाचस्पतिरहर्पतिः ।
रविर्विरोचनः स्कन्दः शास्ता वैवस्वतो यमः ॥५५॥

युक्तिरुन्नतकीर्तिश्च सानुरागः परंजयः ।
कैलासाधिपतिः कान्तस्सविता रविलोचनः ॥५६॥

विद्वत्तमो वीतभयो विश्वभर्ताऽनिवारितः ।
नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ॥५७॥

दूरश्रवा विश्वसहो ध्येयो दुःस्वप्ननाशनः ।
उत्तारणो दुष्कृतिहा विज्ञेयो दुस्सहोऽभवः ॥५८॥

अनादिर्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः ।
विश्वगोप्ता विश्वकर्ता सुवीरो रुचिराङ्गदः ॥५९॥

जननो जनजन्मादिः प्रीतिमान्नीतिमान् धवः ।
वसिष्ठः कश्यपो भानुर्भीमो भीमपराक्रमः ॥६०॥

प्रणवस्सत्पथाचारो महाकोशो महाधनः ।
जन्माधिपो महादेवस्सकलागमपारगः ॥६१॥

तत्त्वं तत्त्वविदेकात्मा विभुर्विश्वविभूषणः ।
ऋषिर्ब्राह्मण ऐश्वर्यजन्ममृत्युजरातिगः ॥६२॥

पञ्चयज्ञसमुत्पत्तिर्विश्वेशो विमलोदयः ।
अनाद्यन्तो ह्यात्मयोनिर्वत्सलो भक्तलोकधृक् ॥६३॥

गायत्रीवल्लभः प्रांशुर्विश्वावासः प्रभाकरः ।
शिशुर्गिरिरतस्सम्राट् सुषेणस्सुरशत्रुहा ॥६४॥

अमोघोऽरिष्टनेमिश्च कुमुदो विगतज्वरः ।
स्वयंज्योतिस्तनुज्योतिरात्मज्योतिरचञ्चलः ॥६५॥

पिङ्गलः कपिलश्मश्रुर्भालनेत्रस्त्रयीतनुः ।
ज्ञानस्कन्दो महानीतिर्विश्वोत्पत्तिरुपप्लवः ॥६६॥

भगो विवस्वानादित्यो योगपारो दिवस्पतिः ।
कल्याणगुणनामा च पापहा पुण्यदर्शनः ॥६७॥

उदारकीर्तिरुद्योगी सद्योगी सदसन्मयः ।
नक्षत्रमाली नाकेशः स्वाधिष्ठानपदाश्रयः ॥६८॥

पवित्रः पापहारी च मणिपूरो नभोगतिः ।
हृत्पुण्डरीकमासीनः शक्रश्शान्तो वृषाकपिः ॥६९॥

उष्णो गृहपतिः कृष्णस्समर्थोऽनर्थनाशनः ।
अधर्मशत्रुरज्ञेयः पुरुहूतः पुरुश्रुतः ॥७०॥

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः ।
जगद्धितैषी सुगतः कुमारः कुशलागमः ॥७१॥

हिरण्यवर्णो ज्योतिष्मान्नानाभतरतो ध्वनिः ।
अरागो नयनाध्यक्षो विश्वामित्रो धनेश्वरः ॥७२॥

ब्रह्मज्योतिर्वसुधामा महाज्योतिरनुत्तमः ।
मातामहो मातरिश्वा नभस्वान्नागहारधृक् ॥७३॥

पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः ।
निरावरणनिर्वारो वैरञ्च्यो विष्टरश्रवाः ॥७४॥

आत्मभूरनिरुद्धोऽत्रिर्ज्ञानमूर्तिमहायशाः ।
लोकवीराग्रणीर्वीरश्चण्डस्सत्यपराक्रमः ॥७५॥

व्यालाकल्पो महाकल्पः कल्पवृक्षः कलाधरः ।
अलंकरिष्णुरचलो रोचिष्णुर्विक्रमोन्नतः ॥७६॥

आयुः शब्दपतिर्वेगी प्लवनः शिखिसारथिः ।
असंसृष्टोऽतिथिश्शक्रप्रमाथी पादपासनः ॥७७॥

वसुश्रवा हव्यवाहः प्रतप्ता विश्वभोजनः ।
जप्यो जरादिशमनो लोहितात्मा तनूनपात् ॥७८॥

बृहदश्वो नभोयोनिस्सुप्रतीकस्तमिस्रहा ।
निदाघस्तपनो मेघः स्वक्षः परपुरञ्जयः ॥७९॥

सुखानिलस्सुनिष्पन्नस्सुरभिश्शिशिरात्मकः ।
वसन्तो माधवो ग्रीष्मो नभस्यो बीजवाहनः ॥८०॥

अङ्गिरा गुरुरात्रेयो विमलो विश्ववाहनः ।
पावनः सुमतिविद्वाँस्त्रैविद्यो नरवाहनः ॥८१॥

मनोबुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः ।
जमदग्निर्बलनिधिर्विगालो विश्वगालवः ॥८२॥

अघोरोऽनुत्तरो यज्ञश्श्रेयो निःश्रेयसां पथः ।
शैलो गगनकुन्दाभो दानवारिररिन्दमः ॥८३॥

रजनीजनकश्चारुविशल्पो लोककल्पधृक् ।
चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः ॥८४॥

आम्नायोऽथ समाम्नायस्तीर्थदेवशिवालयः ।
बहुरूपो महारूपस्सर्वरूपश्चराचरः ॥८५॥

न्यायनिर्मायको न्यायी न्यायगम्यो निरन्तरः ।
सहस्रमूर्धा देवेन्द्रस्सर्वशास्त्रप्रभञ्जनः ॥८६॥

मुण्डी विरूपो विकृतो दण्डी दान्तो गुणोत्तमः ।
पिङ्गलाक्षो जनाध्यक्षो नीलग्रीवो निरामयः ॥८७॥

सहस्रबाहुस्सर्वेशश्शरण्यस्सर्वलोकधृक् ।
पद्मासनः परंज्योतिः परंपार परंफलम् ॥८८॥

पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ।
चराचरज्ञो वरदो वरेशश्च महाबलः ॥८९॥

देवासुरगुरुर्देवो देवासुरमहाश्रयः ।
देवादिदेवो देवाग्निर्देवाग्निसुखदः प्रभुः ॥९०॥

देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः ।
देवदेवमयोऽचिन्त्यो देवदेवात्मसंभवः ॥९१॥

सद्योनिरसुरव्याघ्रो देवसिंहो दिवाकरः ।
विबुधाग्रवरश्रेष्ठः सर्वदेवोत्तमोत्तमः ॥९२॥

शिवज्ञानरतः श्रीमाञ्शिखिश्रीपर्वतप्रियः ।
वज्रहस्तस्सिद्धिखड्गी नरसिंहनिपातनः ॥९३॥

ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ।
नन्दी नन्दीश्वरोऽनन्तो नग्नव्रतधरश्शुचिः ॥९४॥

लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः ।
स्वधर्मा स्वर्गतः स्वर्गस्वरः स्वरमयस्वनः ॥९५॥

बाणाध्यक्षो बीजकर्ता धर्मकृद्धर्मसंभवः ।
दम्भोऽलोभोऽर्थविच्छंभुस्सर्वभूतमहेश्वरः ॥९६॥

श्मशाननिलयस्त्र्यक्षस्सेतुरप्रतिमाकृतिः ।
लोकोत्तरस्फुटालोकस्त्र्यम्बको नागभूषणः ॥९७॥

अन्धकारमखद्वेषी विष्णुकन्धरपातनः ।
हीनदोषोऽक्षयगुणो दक्षारिः पूषदन्तभित् ॥९८॥

धूर्जटिः खण्डपरशुः सकलो निष्कलोऽनघः ।
अकालः सकलाधारः पाण्डुराभो मृडो नटः ॥९९॥

पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ।
सामगेयप्रियोऽधूर्तः पुण्यकीर्तिरनामयः ॥१००॥

मनोजवस्तीर्थकरो जटिलो जीवितेश्वरः ।
जीवितान्तकरो नित्यो वसुरेता वसुप्रदः ॥१०१॥

सद्गतिः सत्कृतिः सिद्धिः सज्जातिः कालकण्टकः ।
कलाधरो महाकालो भूतसत्यपरायणः ॥१०२॥

लोकलावण्यकर्ता च लोकोत्तरसुखालयः ।
चन्द्रसंजीवनश्शास्ता लोकगूढो महाधिपः ॥१०३॥

लोकबन्धुर्लोकनाथः कृतज्ञः कीर्तिभूषणः ।
अनपायोऽक्षरः कान्तः सर्वशास्त्रभृतां वरः ॥१०४॥

तेजोमयो द्युतिधरो लोकानामग्रणीरणुः ।
शुचिस्मितः प्रसन्नात्मा दुर्जेयो दुरतिक्रमः ॥१०५॥

ज्योतिर्मयो जगन्नाथो निराकारो जलेश्वरः ।
तुम्बवीणो महाकोपो विशोकः शोकनाशनः ॥१०६॥

त्रिलोकपस्त्रिलोकेशः सर्वशुद्धिरधोक्षजः ।
अव्यक्तलक्षणो देवो व्यक्providedाव्यक्तो विशांपतिः ॥१०७॥

वरशीलो वरगुणः सारो मानधनो मयः ।
ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्वयः ॥१०८॥

वेधा विधाता धाता च स्रष्टा हर्ता चतुर्मुखः ।
कैलासशिखरावासी सर्वावासी सदागतिः ॥१०९॥

हिरण्यगर्भो द्रुहिणो भूतपालोऽथ भूपतिः ।
सद्योगी योगविद्योगी वरदो ब्राह्मणप्रियः ॥११०॥

देवप्रियो देवनाथो देवज्ञो देवचिन्तकः ।
विषमाक्षो विशालाक्षो वृषदो वृषवर्धनः ॥१११॥

निर्ममो निरहंकारो निर्मोहो निरुपद्रवः ।
दर्पहा दर्पदो दृप्तः सर्वर्तुपरिवर्तकः ॥११२॥

सहस्रजित्सहस्रार्चिः स्निग्धप्रकृतिदक्षिणः ।
भूतभव्यभवन्नाथः प्रभवो भूतिनाशनः ॥११३॥

अर्थोऽनर्थो महाकोशः परकार्यैकपण्डितः ।
निष्कण्टकः कृतानन्दो निर्व्याजो व्याजमर्दनः ॥११४॥

सत्त्ववान् सात्त्विकः सत्यकीर्तिः स्नेहकृतागमः ।
अकम्पितो गुणग्राही नैकात्मा नैककर्मकृत् ॥११५॥

सुप्रीतः सुमुखः सूक्ष्मः सुकरो दक्षिणानिलः ।
नन्दिस्कन्धधरो धुर्यः प्रकटः प्रीतिवर्धनः ॥११६॥

अपराजितः सर्वसत्त्वो गोविन्दः सत्त्ववाहनः ।
अधृतः स्वधृतः सिद्धः पूनमूर्तिर्यशोधनः ॥११७॥

वाराहशृङ्गधृक्शृङ्गी बलवानेकनायकः ।
श्रुतिप्रकाशः श्रुतिमानेकबन्धुरनेककृत् ॥११८॥

श्रीवत्सलशिवारंभः शान्तभद्रः समो यशः ।
भूशयो भूषणो भूतिर्भूतकृद् भूतवाहनः ॥११९॥

अकम्पो भक्तिकायस्तु कालहा नीललोहितः ।
सत्यव्रतमहात्यागी नित्यशान्तिपरायणः ॥१२०॥

परार्थवृत्तिर्वरदो विरक्तस्तु विशारदः ।
शुभदः शुभकर्ता च शुभनामा शुभः स्वयम् ॥१२१॥

अनर्थितोऽगुणः साक्षी ह्यकर्ता कनकप्रभः ।
स्वभावभद्रो मध्यस्थः शीघ्रगः शीघ्रनाशनः ॥१२२॥

शिखण्डी कवची शूली जटी मुण्डी च कुण्डली ।
अमृत्युः सर्वदृक्सिंहस्तेजोराशिर्महामणिः ॥१२३॥

असंख्येयोऽप्रमेयात्मा वीर्यवान् वीर्यकोविदः ।
वेद्यश्च वै वियोगात्मा सप्तावरमुनीश्वरः ॥१२४॥

अनुत्तमो दुराघर्षो मधुरप्रियदर्शनः ।
सुरेशः शरणं सर्वः शब्दब्रह्म सतां गतिः ॥१२५॥

कालपक्षः कालकारी कङ्कणीकृतवासुकिः ।
महेष्वासो महीभर्ता निष्कलङ्को विशृङ्खलः ॥१२६॥

द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः ।
विश्वतः संवृतः स्तुत्यो व्यूढोरस्को महाभुजः ॥१२७॥

सर्वयोनिर्निरातङ्को नरनारायणप्रियः ।
निर्लेपो निष्प्रपञ्चात्मा निर्व्यङ्गो व्यङ्गनाशनः ॥१२८॥

स्तव्यः स्तवप्रियः स्तोता व्यासमूर्तिर्निरङ्कुशः ।
निरवद्यमायोपायो विद्याराशी रसप्रियः ॥१२९॥

प्रशान्तबुद्धिरक्षुण्णः संग्रही नित्यसुंदरः ।
वैयाघ्रधुर्यो धात्रीशः शाकल्यः शर्वरीपतिः ॥१३०॥

परमार्थगुरुर्दृष्टिः शरीराश्रितवत्सलः ।
सोमो रसज्ञो रसदः सर्वसत्त्वावलम्बनः ॥१३१॥

ततः स कौतुकी शंभुश्चकार चरितं द्विजाः ।
महाद्भुतं सुखकरं तदेव श्रृणुतादरात् ॥१३२॥

इति श्रीशिवसहस्रनाम संपूर्णम्

■

द्वादशज्योतिर्लिङ्गस्मरणम्

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोङ्कारममलेश्वरम् ॥१॥
परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम् ।
सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥२॥
वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ।
हिमालये तु केदारं घुश्मेशं च शिवालये ॥३॥
एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः ।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥४॥

जो मनुष्य प्रतिदिन प्रातःकाल और संध्याकाल में इन बारहज्योतिर्लिङ्गोंके नामों का स्मरण करता है, उसके सात जन्मों का किया हुआ पाप इन लिङ्गों के स्मरणमात्र से नष्ट हो जाता है।

॥ इस प्रकार द्वादशज्योतिर्लिङ्गस्मरण सम्पूर्ण हुआ ॥

सर्वयोनिर्निरातङ्को नरनारायणप्रियः ।
निर्लेपो निष्प्रपश्चात्मा निर्व्यङ्गो व्यङ्गनाशनः ॥१२८॥

स्तव्यः स्तवप्रियः स्तोता व्यासमूर्तिर्निरङ्कुशः ।
निरवद्यमायोपायो विद्याराशी रसप्रियः ॥१२९॥

प्रशान्तबुद्धिरक्षुण्णः संग्रही नित्यसुंदरः ।
वैयाघ्रधुर्यो धात्रीशः शाकल्यः शर्वरीपतिः ॥१३०॥

परमार्थगुरुर्दृष्टिः शरीराश्रितवत्सलः ।
सोमो रसज्ञो रसदः सर्वसत्त्वावलम्बनः ॥१३१॥

ततः स कौतुकी शंभुश्चकार चरितं द्विजाः ।
महाद्भुतं सुखकरं तदेव श्रृणुतादरात् ॥१३२॥

इति श्रीशिवसहस्रनाम संपूर्णम्

■

द्वादशज्योतिर्लिङ्गस्मरणम्

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोङ्कारममलेश्वरम् ॥१॥
परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम् ।
सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥२॥
वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ।
हिमालये तु केदारं घुश्मेशं च शिवालये ॥३॥
एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः ।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥४॥

जो मनुष्य प्रतिदिन प्रातःकाल और संध्याकाल में इन बारहज्योतिर्लिङ्गोंके नामों का स्मरण करता है, उसके सात जन्मों का किया हुआ पाप इन लिङ्गों के स्मरणमात्र से नष्ट हो जाता है।

॥ इस प्रकार द्वादशज्योतिर्लिङ्गस्मरण सम्पूर्ण हुआ ॥

ॐ नमः शिवाय



29
V
JAC

E-mail : rahultaak@gmail.com